Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीहेमचन्द्राचार्यग्रन्थावली. न० ५.

श्रीहेमचन्द्राचार्यसूरिविरचित—

# वेदाङ्कुशः

श्रीमत्पन्यासश्रीनीतिविजयमहाराजसमुपदिष्ट–पट्टननिवासि 'शा. लहेरचन्द खीम[redacted]याः

पट्टनस्थश्रीहेमचन्द्राचार्यसभायाः सेक्रेटरी

'शा. मणिलाल रतनचन्द' इत्यनेन प्रकाशितः

संशोधितश्च

श्रावकपण्डितवीरचन्द्रप्रभुदासाभ्यामिति ।

'पांचकुवा' समीपस्थ 'सत्यविजय' मुद्रणाधिपति 'शा. सांकलचंद हरिलालेन' मुद्रितम्

अहम्मदावादे.

विक्रम संवत् १९७४. वीर संवत् २४४४. सन १९१८.

प्रत २५०.

मूल्यम् ०-६-०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# પ્રાસ્તાવિક.

આ ગ્રંથની ૧ પ્રત અમને પાટણમાં ફોફલીયાવાડાના 'શાહ હાલાભાઈ મગનલાલ' ની દેખરેખ નીચેના ભંડારમાંથી મળી છે. અને કેટલુંક કામ છપાયા પછી મુનિમહારાજશ્રી 'ભક્તિ વિજયજી' તરફથી બે પ્રતો અમને મળી છે. તેને આધારે આ ગ્રંથ પ્રસિદ્ધ કર્યો છે.

આ ગ્રંથનું બીજું નામ 'દ્વિજવદન ચપેટા' છે અથવા તો આવી જાતના એક ગ્રન્થનું નામ 'દ્વિજવદન ચપેટા' હોય. અને બીજા ગ્રંથનું નામ 'વેદાંકુશ' હોય એમ જણાય છે. પણ ભિન્નભિન્ન પ્રતોમાં નામની સંકીર્ણતા હોવાથી અમે કંઇ નિશ્ચય ઉપર આવી શક્યા નથી. વળી આ ગ્રંથના કર્તા તરીકે શ્રી હેમચંદ્રાચાર્ય અને શ્રીહરિ ભદ્રસૂરિ એમ બે આચાર્યશ્રીના નામો જોવામાં આવે છે. પાછળી નામ બન્ને કાયમ રાખ્યા છે. ભિન્ન ભિન્ન પ્રતમાં જે મળ્યું તે કાયમ રાખ્યું છે.

પાછળનો ભાગ બ્રાહ્મણત્વના વિચારથી જુદો પડે છે, તે જુદો ગ્રંથ હોય તેમ જણાય છે. પહેલાનું નામ દ્વિજવદન ચપેટા હોય અને બીજાનું નામ વેદાંકુશ હોય એમ જણાય છે. આમાં પહેલાના કર્તા પ્રથમ આચાર્યશ્રી જણાય છે અને બીજાના કર્તા બીજા જણાય છે.

વળી એક ત્રીજી પણ દ્વિજવદન ચપેટા અમારી પાસે પન્યાસજી મહારાજશ્રી નીતિવિજયજી તરફથી મળી છે. તે સંગ્રહરૂપ નહીં છતાં કોઈ જૈનાચાર્યની કેટલીક સ્વતંત્ર કૃતિ છે. તેમાં પણ શ્રી હેમચંદ્રાચાર્યનું નામ છે. આમાં ખરૂં શું છે? તે અમે નિર્ણિત કરી શક્યા નથી.

વિષયનું સ્વતંત્ર વિવેચન કરનારા વક્તાઓને આમાંના વાક્યો પ્રમાણ તરીકે ઉપયોગમાં આવી શકે એવા સંગ્રહરૂપ હોવાથી આ ગ્રન્થનો પ્રકાશ ચરિતાર્થ છે.

લી૦ સંશોધકો.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# संग्रहीत ग्रन्थोनी यादी.

१ आंगिरसस्मृति.
२ आत्रेयस्मृति.
३ आदित्यपुराण.
४ आदिपर्व.
५ आयुर्वेद.
६ इतिहास.
७ उत्तरमिमांसा.
८ ऋगूवेद.
९ कात्यायनस्मृति.
१० गीता.
११ गोविन्द कीर्त्तन.
१२ चतुर्थारण्यक.
१३ तैत्तिरिय आरण्यक.
१४ दक्षस्मृति.
१५ देव पुराण.
१६ धर्मशास्त्र.
१७ नगरपुराण.
१८ पद्मपुराण.
१९ पारासरस्मृति.
२० ब्रह्माण्डपुराण.
२१ बृहदारण्यक.
२२ बृहस्पतिस्मृति.
२३ भागवत.
२४ मनुस्मृति.
२५ मिताक्षरा.
२६ मृगेन्द्र पुराण.
२७ यजुर्वेद.
२८ यमस्मृति.
२९ याज्ञवल्क्यस्मृति.
३० वाजसेनेय संहिता.
३१ वाशिष्ठस्मृति.
३२ विवेक विलास.
३३ विष्णुपुराण.
३४ विष्णुभक्तिचन्द्रोदय.
३५ शंखस्मृति.
३६ शिवपुराण.
३७ शुकसंवाद.
३८ श्येनस्मृति.
३९ सामवेद.
४० स्कन्दपुराण.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# विषयानुक्रमणिका.


| विषय. | श्लोक संख्या. |
|---|---|
| १ परोपकार. | १ |
| २ धर्म. | १७ |
| ३ सत्य. | ५१ |
| ४ निन्दा | ६६ |
| ५ दया. | ७५ |
| ६ दान. | २४६ |
| ७ पात्र. | २५७ |
| ८ अपात्र | २७३ |
| ९ अतिथि | २९२ |
| १० शील | ३०८ |
| ११ द्विजत्व | ३९९ |
| १२ तपः | ४९९ |
| १३ कर्म | ४३५ |
| १४ भाव | ६५१ |
| १५ शौच | ७०५ |
| १६ चौर्य | ७३८ |
| १७ देहाशुचि. | ७४६ |
| १८ दन्तधावन. | ७५१ |
| १९ क्षमा. | ७६० |
| २० मांस. | ७६३ |
| २१ मद्य. | ७८६ |
| २२ मधु. | ७९९ |
| २३ मूलक | ८१४ |
| २४ रात्रिभोजन | ८२४ |
| २५ ब्राह्मणत्वसिद्धि. | |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्हम्

श्रीहेमचन्द्रसूरिविरचित-

# वेदाङ्कुशः ॥

विशेषं विना महाभारतादौ । इतिहाससमुच्चये—

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् । आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ १ ॥

श्लोकार्द्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः । परोपकारः पुण्याय पापाय परपीडनम् ॥ २ ॥

पद्मपुराणे—कर्मणा मनसा वाचा सर्वाऽवस्थासु सर्वदा । परपीडां न कुर्वन्ति न ते यान्ति यमक्षयम् ॥ ३ ॥

स्कन्दपुराणे—परोपकरणं येषां जागर्ति हृदये सताम् । नश्यन्ति विपदस्तेषां संपदः स्युः पदे पदे ॥ ४ ॥

परोपकृत्या यो धर्मो धर्मो दानाद्धि संभवः । एकत्र तुलितो धात्रा तत्र पूर्वोऽभवद् गुरुः ॥ ५ ॥

परिनिर्मथ्य वाग्जालं निर्णीतमिदमेव हि । नोपकारात्परो धर्मो नाऽपकारादघं परम् ॥ ६ ॥

तीर्थस्नानैर्न सा शुद्धिर्बहुदानैर्न तत्फलम् । तपोभिरुग्रैस्तन्नाप्यमुपकृत्या यदाप्यते ॥ ७ ॥

विष्णुपुराणे—पुराणं वैष्णवं चैतत्सर्वकिल्बिषनाशनम् । विशिष्टं सर्वशास्त्रेभ्यः पुरुषार्थोपसाधकम् ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राणिनामुपकाराय यदेवेह परत्र च । कर्मणा मनसा वाचा तदेव मतिमान् भजेत् ॥ ९ ॥

पद्मपुराणे—दधीचिना पुरा गीतं श्लोकार्द्धं श्रूयते भुवि । सर्वधर्ममयः सारः सर्वधर्मेषु संयमः ॥ १० ॥

परोपकारः कर्तव्यः प्राणैरपि धनैरपि । परोपकारजं पुण्यं न स्यात्क्रतुशतैरपि ॥ ११ ॥

इतिहासे—न पापं प्रति पापः स्यात् साधुरेव सदा भवेत् । आत्मनैव हतः पापो यः पापं कर्त्तुमिच्छति ॥ १२ ॥

सुलभाः पुरुषा लोके साधवः साधुकारिषु । असाधुषु पुनः साधुर्दुर्लभः पुरुषो भुवि ॥ १३ ॥

ते साधवः सुजन्मानस्तैरियं भूषिता मही । अपकारिषु भूतेषु ये भवन्त्युपकारिणः ॥ १४ ॥

दग्धं सोऽत्रानुदहति हतमेवानुहन्ति च । मृतं मारयते चैव यः पापे पापमाचरेत् ॥ १५ ॥

महामोहहतं पूर्वं यो जन्तुं हन्ति निर्णयः । स प्रेत्य नरकं याति नृशंसो मृतमारकः ॥ १६ ॥

## अथ धर्मे

धर्मः श्रुतोपि दृष्टोपि कृतो वा कारितोपि वा । अनुमोदितोपि राजेन्द्र ! पुनात्यासप्तमं कुलम् ॥ १७ ॥

मनुस्मृतौ—नामुत्र सहायार्थं पिता माता च तिष्ठतः । न पुत्रदारं तज्ज्ञातिधर्मस्तिष्ठति केवलम् ॥ १८ ॥

तस्माद्धर्मं सहायार्थं नित्यं संचिनुयाच्छनैः । धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥ १९ ॥

इतिहासे—धर्मात्मा पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते । कामः संसारहेतुश्च हृत्तापो मत्सरः स्मृतः ॥ २० ॥

जीवतः शिलवृत्त्यापि धर्मो यस्य न सीदति । आद्य एव स मन्तव्यो धर्मवित्ता हि साधवः ॥ २१ ॥

भागवतपुराणे तन्महिमा—श्लोकं वा श्लोकपादं वा शृणुयाद्भक्तिभावतः । सर्वपापविनिर्मुक्तो वैष्णवीगतिमाप्नुयात् ॥ २२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आदित्यपु—यद्दानमभयं पुण्यं सर्वदानोत्तमोत्तमम् । तस्मात्सा परिहर्तव्या हिंसा सर्वत्र सर्वदा ॥ १३४ ॥
त्रैलोक्यमखिलं हत्वा यत्पापं जायते नृणाम् । शिवालये निहत्यैकमपि तत्पापमाप्नुयात् ॥ १३५ ॥
श्लोकद्वयं पठेद्यस्तु श्लोकमेकमथापि वा । श्रद्धावान् पापकर्मापि स गच्छेत्सवितुः पदम् ॥ १३६ ॥
गीता—पृथिव्यामप्यहं पार्थ ! वायावग्नौ जलेप्यहम् । वनस्पतिगतश्चाहं सर्वभूतगतोप्यहम् ॥ १३७ ॥
यो मां सर्वगतं ज्ञात्वा न च हिंस्यात् कदाचन । तस्याहं न प्रणश्यामि स च मां न प्रणश्यति ॥ १३८ ॥
मिताक्ष०—अध्यास्य शयनं यानमासनपादुके तथा । द्विजः पलाशवृक्षस्य त्रिरात्रं तु व्रती भवेत् ॥ १३९ ॥
वटार्काश्वत्थपत्रेषु कुम्भीतिन्दुकपत्रयोः । कोविदारकदम्बेषु भुक्त्वा चान्द्रायणं चरेत् ॥ १४० ॥
पद्मपु—सच्छायान् फलपुष्पाढ्यान् पादपान् पथि रोपितान् । छिन्दन्ति ये नरा मूढास्ते यान्ति नरकं चिरम् ॥ १४१ ॥
मृगेन्द्रपु—शाखामूले दले पुष्पे फले किञ्जल्कमध्यतः । ये जीवाः सन्ति तद्वर्णस्तेषां वक्तुं न कोप्यलम् ॥ १४२ ॥
विष्णुपु—सन्ध्या रात्रिरहो भूमिर्गगनं वायुरम्बु च । हुताशनो मनो बुद्धिर्भूतादिस्त्वं तथाऽच्युतः ॥ १४३ ॥
देवा यक्षाः सुराः सिद्धा नागा गन्धर्वकिन्नराः । पिशाचा राक्षसाश्चैव मनुष्याः पशवस्तथा ॥ १४४ ॥
पक्षिणः स्थावराश्चैव पिपीलकसरिसृपाः । भूरापोऽग्निर्नभो वायुः शब्दं स्पर्शस्तथा रसः ॥ १४५ ॥
रूपं गन्धो मनो बुद्धिरात्मा कालस्तथा गुणाः । एतेषां परमार्थश्च सर्वमेव त्वमच्युत ! ॥ १४३ ॥
किंवाऽत्र बहुनोक्तेन संक्षेपेणैतदुच्यते । देव तिर्यग् मनुष्येषु पुन्नाम्नि भगवान् हरिः ॥ १४७ ॥
स्त्रीनाम्नि लक्ष्मीमैंत्रेय ! नानयोर्विद्यते परम् । यद्भूतं यच्च वै भाव्यं पुरुषोत्तम ! तद्भवान् ॥ १४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी । कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥ १४९ ॥
ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते नमः । रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्त्तये ॥ १५० ॥
सर्वभूतात्मके तात ! जगन्नाथे जगन्मये । परमात्मनि गोविन्दे मित्रामित्रकथाः कुतः ॥ १५१ ॥
त्वय्यस्ति भगवान् विष्णुर्मयि चान्यत्र वास्ति स । यतस्ततोऽयं मे मित्रं शत्रुश्चेति पृथक् कथम् ॥ १५२ ॥
एतद्विजानता सर्वं जगत्स्थावरजङ्गमम् । द्रष्टव्यमात्मवद्विष्णुर्यतोऽयं सर्वरूपधृत् ॥ १५३ ॥
एवं ज्ञाते स भगवाननादिपुरुषोत्तमः । प्रसीदतेऽच्युतस्तस्मिन् प्रसन्ने क्लेशसंक्षयः ॥ १५४ ॥

तुर्यारण्यके—सोऽहं नारायणो नाम प्रभुर्वः शाश्वतोऽव्ययः । विधाता सर्वभूतानां संहर्ता च द्विजोत्तमः ॥ १५५ ॥
अहं विष्णुरहं ब्रह्मा शक्रश्चाहं सुराधिपः । अहं वैश्रवणो राजा यमः प्रेताधिपस्तथा ॥ १५६ ॥
ऋग्वेदः सामवेदश्च यजुर्वेदस्त्वथर्वणः । मत्तः प्रादुर्भवन्त्येते मामेव प्रविशन्ति च ॥ १५७ ॥
कामं क्रोधं च हर्षं च भयं मोहं तथैव च । मामेव विद्धि रूपाणि सर्वथैतानि सत्तमः ॥ १५८ ॥

भाग०— अहं सर्वेषु भूतेषु भूतात्मा च स्थितः सदा । तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडम्बनाः ॥ १५९ ॥
यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरम् । हत्वाऽर्चां भजते मौढ्यात् हतान्येव जुहोति सः ॥ १६० ॥
द्विषतः परकाये मां मानिनो भिन्नदर्शिनः । भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति ॥ १६१ ॥
अहमुच्चावचैर्द्रव्यैः क्रिययोपाधिनान्वितैः । नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥ १६२ ॥
अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् । यावन्न देवः स्वहृदि सर्वभूतेष्ववस्थितः ॥ १६३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूजयेदुपदेष्टारं वस्त्रवित्तविभूषणैः । ग्रन्थस्योद्यापने देया गौरुपस्करसंयुता ॥ २३ ॥
श्लोकार्द्धं श्लोकपादं वा नित्यं भागवतोद्भवम् । पठेत् शृणोति यो भक्त्या गोसहस्रफलं लभेत् ॥२४॥
यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने ! । अष्टादशपुराणानां फलमाप्नोति मानवः ॥ २५ ॥
श्लोकं भागवतं वापि श्लोकार्द्धं पादमेव वा । लिखितं तिष्ठति यस्य गृहे तस्य सदा हरिः ॥ २६ ॥

तत्र च— कृते प्रवर्तते धर्मश्चतुष्पात्तज्जनैर्धृतः । सत्यं तपो दया दानमिति पादा विभोर्नृप ! ॥ २७ ॥
अहिंसा सत्यमस्तेयमकामक्रोधलोभता । भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः ॥ २८ ॥

विवेकविलासे—एकवर्णं यथा दुग्धं बहुवर्णासु धेनुषु । तथा धर्मस्य वैचित्र्यं तत्त्वमेकं परं पुनः ॥ २९ ॥

मिताक्षरायां—धर्मार्थं यतमानस्तु न चेच्छक्नोतिमानवः । प्राप्तो भवति तत्पुण्यमत्र मे नास्ति संशयः ॥ ३० ॥

मनुस्मृतौ—अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः । एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥ ३१ ॥

आदिपर्वणि—अहिंसा सत्यवचनं क्षमा वेति विनिश्चितम् । ब्राह्मणस्य परो धर्मो वेदानां धर्मणादपि ॥ ३२ ॥
अहिंसा परमो धर्मः सर्वप्राणभृतां वरः । तस्मात् प्राणभृतः सर्वान्न हिंस्यात् ब्राह्मणः क्वचित् ॥ ३३ ॥

मिताक्षरायाम्—अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः । दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम् ॥ ३४ ॥
ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान् । सेवेत यो हि निष्कामो योग्यतां स्वं मनो नयन् ॥ ३५ ॥

विष्णुपुराणे—अहिंसा सत्यमस्तेयं त्यागो मैथुनवर्जनम् । पञ्चैतानि पवित्राणि सर्वेषां धर्मचारिणाम् ॥ ३६ ॥

इतिहासे— अहिंसकाः क्षान्तिपरायणास्तथा सुखेषु दुःखेषु समानबुद्धयः ।
ऋजुस्वभावा विषयेषु निःस्पृहाः तरन्ति संसारसमुद्रमश्रमम् ॥ ३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहर्निशं चित्तविनिग्रहे रताः स्वपुत्रदारेष्वपि त्यक्तबुद्धयः ।
अहंकृतेर्निर्गतचित्तवृत्तयस्तरन्ति संसारसमुद्रमश्रमम् ॥ ३८ ॥

भागवते—केवलेन ह्यधर्मेण कुटुम्बभरणोत्सुकः । याति जीवोऽन्धतामिश्रं चरमं तमसः पदम् ॥ ३९ ॥

चतुर्थारण्यके—ये नैव विद्यां न तपो न दानं न चापि मूढा नियमे यतन्ते ।
न चाधिगच्छन्ति सुखानि भाग्यास्तेषामयं चैव परश्च नास्ति ॥ ४० ॥

मनुस्मृतौ—पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥ ४१ ॥

कात्यायनस्मृतौ—स्मृतिवाक्यं यो मोहादज्ञानाद्वा सुखेच्छया । अतिक्रमेत पापात्मा महापातकदोषकृत् ॥ ४२ ॥

स्कन्दपुराणे—अष्टादशसु विद्यासु मीमांसा गरीयसी । ततोपि तर्कशास्त्राणि पुराणं तेभ्य एव च ॥ ४३ ॥

आदिपर्वणि—चत्वार एकतो वेदा भारतं चैकमेकतः । समागतैः सुरर्षिभिस्तुलामारोपितं पुरा ॥ ४४ ॥
महत्वे च गुरुत्वे च ध्रियमाणे यतोऽधिकम् । महत्वाद्भारवत्त्वाच्च महाभारतमित्यतः ॥ ४५ ॥

वेदाः प्रमाणं स्मृतयः प्रमाणं धर्मार्थयुक्तं वचनं प्रमाणम् ।
नैतत्त्रयं यस्य भवेत्प्रमाणं कस्तस्य कुर्याद्वचनं प्रमाणम् ॥ ४६ ॥

इतिहासे— तर्कोऽप्रतिष्ठः स्मृतयोऽप्यभिन्ना नासावृषिर्यस्य मतं न भिन्नम् ।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ॥ ४७ ॥
यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।



For Private and Personal Use Only

इह चत्वारि दानानि प्रोक्तानि परमर्षिभिः । विचार्य नानाशास्त्राणि शर्मणेऽत्र परत्र च ॥ १०४ ॥
भीतेभ्यश्चाभयं देयं व्याधितेभ्यस्तथौषधम् । देया विद्यार्थिनां विद्या देयमन्नं क्षुधातुरे ॥ १०५ ॥
इति० युधिष्ठिर उ०--यो रक्षेत्प्राणिनं ब्रह्मन् ! भयार्त्तं शरणागतम् । तस्य पुण्यफलं यत्स्यात् तन्मे ब्रूहि तपोधन ! ॥१०६॥
एकतः क्रतवः सर्वे समग्रवरदक्षिणाम् । एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥ १०७ ॥
इदमेव पुरा देवस्तु ऽया समतोलयन । प्राणरक्षणमेवेह गौरवेणातिरिच्यते ॥ १०८ ॥
जङ्गमानि च भूतानि स्थावराणि च ये नराः । आत्मवत् परिरक्षन्ति ते यान्ति परमां गतिम् ॥ १०९ ॥
सर्वसत्त्वेषु यद्दानमेकसत्त्वे च या दया । सर्वसत्त्वप्रदानाच्च दयैकास्मिन विशिष्यते ॥ ११० ॥
चतुःसागरपर्यन्तां यो दद्यात् पृथिवीमिमाम् । अभयं यस्तु भूतेभ्यस्तयोरभयदोऽधिकः ॥ १११ ॥
सर्वे वेदा न तत्कुर्युः सर्वे यज्ञाश्च भारत ! । सर्वे तीर्थाभिषेकाश्च यत्कुर्यात्प्राणिनां दया ॥ ११२ ॥
दत्तमिष्टं तपस्तप्तं तीर्थसेवा श्रुतं तथा । सर्वाण्यभयदानस्य कलां नार्हन्ति षोडशीम् ॥ ११३ ॥
प्राणिनं वध्यमानं यः स्वशक्ति समुपेक्षते । स याति नरकं घोरमिति प्राहुर्मनीषिणः ॥ ११४ ॥
लोभाद्वेषाद्भयाद्वापि यस्त्यजेत्शरणागतम् । ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः ॥ ११५ ॥
शास्त्रेषु निष्कृतिर्दृष्टा महापातकिनामपि । शरणागतहन्तव्ये न दृष्टा निष्कृतिः क्वचित् ॥ ११६ ॥
यूकामत्कुणदंशादीन् ये जन्तूंस्तुदतस्तनुम् । पुत्रवत्परिरक्षन्ति ते नराः स्वर्गगामिनः ॥ ११७ ॥
वने वनतृणाहारा प्राणिनोऽनपराधिनः । हन्तुमिच्छति यो दीनान् तं विद्यात्ब्रह्मघातकम् ॥ ११८ ॥

गोव्रजे वा वने चापि ग्रामे वा नगरेऽपि वा । योऽग्निं समुत्सृजेत्मूढस्तं विद्यात् ब्रह्मघातकम् ॥ ११९ ॥
आत्मा विष्णुः समस्तानां वासुदेवो जगत्पतिः । तस्मान्न वैष्णवैः कार्या परहिंसा विशेषतः ॥ १२० ॥
पद्मपु— पङ्ग्वन्धबालवृद्धानां रोग्यनाथदरिद्रिणाम् । ये पुष्णन्ति सदा वैश्य ! ते मोदन्ते सदा दिवम् ॥ १२१ ॥
न देवैर्नैव दानैश्च न तपोभिर्नवाऽध्वरैः । कथंचित्सद्गतिं यान्ति पुरुषाः प्राणहिंसकाः ॥ १२२ ॥
अहिंसा परमो धर्मः अहिंसैव परं तपः । अहिंसैव परं दानमित्याहुर्मुनयः सदा ॥ १२३ ॥
मशकान्मत्कुणान्दंशान् यूकादिप्राणिनस्तथा । आत्मौपम्येन रक्षन्ति पुरुषा ये दयालवः ॥ १२४ ॥
तप्ताङ्गारमयःकीलं मार्गं प्रेतां तरङ्गिणीम् । दुर्गतिं च न पश्यन्ति कृतान्तास्यं च ते नराः ॥ १२५ ॥
भूतानि येऽत्र हिंसन्ति जलस्थलचराणि च । जीवनार्थं च ते यान्ति कालसूत्रं च दुर्गतिम् ॥ १२६ ॥
स्वमांसभोजनास्तत्र पूयशोणितफेनपाः । मज्जन्तश्च वसापङ्के दष्टाः कीटैरयोरदैः ॥ १२७ ॥
परस्परं च खादन्तो ध्वान्ते चान्योन्यघातिनः । वसन्ति कल्पमेकं ते रटन्तो दारुणं भृशम् ॥ १२८ ॥
नरकान्निर्गता वैश्य ! स्थावराः स्युश्चिरं तु ते । ततो गच्छन्ति ते क्रूरास्तिर्यग्योनिशतेषु च ॥ १२९ ॥
पश्चाद्भवन्ति जात्यन्धाः काणाः कुब्जाश्च पङ्गवः । दरिद्रा अङ्गहीनाश्च मानुष्याः प्राणिहिंसकाः ॥ १३० ॥
तस्माद्वैश्य ! परद्रोहं कर्मणा मनसा गिरा । लोकद्वयसुखेप्सुर्यो धर्मज्ञो न समाचरेत् ॥ १३१ ॥
प्रविशन्ति यथा नद्यः समुद्रमृजुवक्रगाः । सर्वे धर्मा अहिंसायां प्रविशन्ति तथा दृढम् ॥ १३२ ॥
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः । अभयं येन भूतेभ्यो दत्तं सर्वसुखावहम् ॥ १३३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथैव धर्मो विदुषा परीक्ष्यते श्रुतेन शीलेन तपोदयागुणैः ॥ ४८ ॥
कथमुत्पद्यते धर्मः कथं धर्मो विवर्द्धते । कथं च स्थाप्यते धर्मः कथं धर्मो विनश्यति ? ॥ ४९ ॥
सत्येनोत्पद्यते धर्मो दयादानेन वर्द्धते । क्षमयाऽवस्थाप्यते धर्मः क्रोधलोभाद्विनश्यति ॥ ५० ॥

## अथ सत्ये

मनुस्मृतौ—सत्यं ब्रूयात्प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् । प्रियं नानृतं ब्रूयादेष धर्मः सनातनः ॥ ५१ ॥
विष्णुपुराणे—तस्मात्सत्यं वदेत्प्राज्ञो यत् परप्रीतिकारणम् । सत्यं यत् परदुःखाय तत्र मौनपरो भवेत् ॥ ५२ ॥
प्रियमुक्तं हितं नैतदिति मत्वा न तद्वदेत् । श्रेयस्तत्र हितं वाक्यं यद्यप्यत्यन्तमप्रियम् ॥ ५३ ॥
आदिपर्वणि—पृष्टः साक्षी तु यः साक्ष्यं जानानोप्यन्यथा वदन् । स पूर्वानात्मनः सप्तकुलान्हन्यात्तथापरान् ॥ ५४ ॥
यश्च कार्यार्थे तत्त्वज्ञो जानानोपि न भाषते । सोपि तेनैव पापेन लिप्यते नात्र संशयः ॥ ५५ ॥
अश्वमेधसहस्रं तु सत्यं तु तुलया धृतम् । अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ ५६ ॥
सर्ववेदाधिगमनं सर्वतीर्थावगाहनम् । सत्यं च वदतो राजन् ! समं वा स्यान्नवा समम् ॥ ५७ ॥
नास्ति सत्यात् परो धर्मो न सत्याद्विद्यते परम् । नहि तीव्रतरं किञ्चिदनृतादिह कथ्यते ॥ ५८ ॥
तुर्यारण्यके—सत्यार्जवे धर्ममाहुः परं धर्मविदो जनाः । दुर्ज्ञेयः शाश्वतो धर्मः स तु सत्ये प्रतिष्ठितः ॥ ५९ ॥
मनुस्मृतौ—साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि । अवाङ्नरकमेवैतः प्रेत्य स्वर्गाच्च हीयते ॥ ६० ॥
यावतो बान्धवान् यस्मिन् हन्ति साक्ष्येऽनृतं वदन् । तावतः संख्यया तस्मिञ्शृणु सौम्यानुपूर्वशः ॥ ६१ ॥

For Private and Personal Use Only

पञ्च पश्वनृते हन्ति दश हन्ति गवानृते । शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥ ६२ ॥
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् । सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदी ॥ ६३ ॥
शूद्रविट्क्षत्रियविप्राणां यत्रोक्तेऽर्थे भवेद्वधः । तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते ॥ ६४ ॥
पद्मपुराणे—वक्ता परुषवाक्यानां मन्तव्यो नरकागतः । सन्देहो न विशां श्रेष्ठ ! पुनर्यास्यति दुर्गतिम् ॥ ६५ ॥

## अथ निन्दायाम्.

आदित्यपुराणे—न पापं पापिनां ब्रूयात् तथा पापमपापिनाम् । सत्येन तुल्यदोषी स्यादसत्येन द्विदोषभाक् ॥ ६६ ॥
मनु०—गुरोर्यत्र परीवादो निन्दा चापि प्रवर्तते । कर्णौ तत्र पिधातव्यौ गन्तव्यं च ततोऽन्यतः ॥ ६७ ॥
परिवादात्खरो भवति श्वा वै भवति निन्दकः । परभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥ ६८ ॥
मिता०—स्वगुरूणामधिक्षेपः साधुनिन्दा सुहृत्क्रुधः । ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् ॥ ६९ ॥
इति०—पिशुनो यश्च लोकानां रन्ध्रान्वेषणतत्परः । उद्वेगजननः क्रूरः संविद्याद् ब्रह्मघातकम् ॥ ७० ॥
द्विषामपि च दोषान् ये न वदन्ति कदाचन । कीर्त्तयन्ति गुणांश्चैव ते नराः स्वर्गगामिनः ॥ ७१ ॥
ये चाभ्यासवशाद्वक्तुं न जानन्ति वचोऽप्रियम् । प्रियवाक्यैकविज्ञानास्ते नराः स्वर्गगामिनः ॥ ७२ ॥
असत्येष्वपि सत्या ये ऋजवोऽनार्जवेष्वपि । रिपुष्वपि हिता ये च ते नराः स्वर्गगामिनः ॥ ७३ ॥
आक्रोशन्तं स्तुवन्तं च तुल्यं पश्यन्ति ये नराः । शान्तात्मानो जितात्मानस्ते नराः स्वर्गगामिनः ॥ ७४ ॥



For Private and Personal Use Only

# अथ दयायाम्

यो दद्यात्काञ्चनं मेरुं कृत्सनां चैव वसुंधराम् । एकस्य जीवितं दद्यात्तत्तुल्यं न युधिष्ठिर ! ॥ ७५ ॥
मार्यमाणस्य हेमाद्रिं राज्यं चापि प्रयच्छतु । तदनिष्टं परित्यज्य जीवो जीवितुमिच्छति ॥ ७६ ॥
अहिंसा सर्वजीवानां सर्वज्ञैः परिभाषिता । इदं हि मूलं धर्मस्याशेषस्तस्यैव विस्तरः ॥ ७७ ॥
वरमेकस्य सत्त्वस्य प्रदत्ताऽभयदक्षिणा । न तु विप्रसहस्रेभ्यो गोसहस्रमलङ्कृतम् ॥ ७८ ॥
हेमधेनुधरादीनां दातारः सुलभा भुवि । दुर्लभः पुरुषो लोके यः प्राणिष्वभयप्रदः ॥ ७९ ॥
महतामपि दानानां कालेन क्षीयते फलम् । भीताभयप्रदानस्य क्षय एव न विद्यते ॥ ८० ॥
नातो भूयस्तमो धर्मः कश्चिदन्योऽस्ति भूतले । प्राणिनां भयभीतानामभयं यत्प्रदीयते ॥ ८१ ॥
अभयं सर्वसत्त्वेभ्यो यो ददाति दयापरः । तस्य देहाद्विमुक्तस्य भयमेव न विद्यते ॥ ८२ ॥
यस्य चित्तं द्रवीभूतं कृपया सर्वजन्तुषु । तस्य ज्ञानं च मोक्षश्च न जटाभस्मचीवरैः ॥ ८३ ॥
जीर्णे भोजनमात्रे यः कपिलः प्राणिनां दया । बृहस्पति रविश्वासः ? पञ्चालस्त्रीषु मार्दवम् ॥ ८४ ॥
अमेध्यमध्ये कीटस्य सुरेन्द्रस्य सुरालये । समाना जीविताकाङ्क्षा समं मृत्युभयं द्वयोः ॥ ८५ ।
यो यत्र जायते जन्तुः स तत्र रमते चिरम् । अतः सर्वेषु जीवेषु दयां कुर्वन्ति साधवः ॥ ८६ ॥
भागवते—जन्तुर्वै सर्व एतस्मिन् यां यां योनिमनुव्रजेत् । तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ॥ ८७ ॥
सर्वात्मना न हिंसन्ति भूतग्रामेषु किञ्चन । उच्चावचेषु दैत्येन्द्र ! सद्भावविधृतस्पृहाः ॥ ८८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावन्ति पशुरोमाणि पशुगात्रेषु भारत ! । तावद्वर्षसहस्राणि पच्यन्ते पशुघातकाः ॥ ८९ ॥
मनु०—यावन्ति पशुरोमाणि तावत्कृत्वोऽत्र मारणम् । वृथा पशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥ ९० ॥
शोणितं यावतः पांशून् संगृह्णाति महीतलात् । तावतोऽद्धानमुत्रान्यैः शोणितोत्पादकोऽद्यते ॥ ९१ ॥
ताडयित्वा तृणेनापि संरम्भान्मतिपूर्वकम् । एकविंशतिमाजानीः पापयोनिषु जायते ॥ ९२ ॥
तामिस्रगन्धतामिस्रं महारौरवरौरवम् । नरकं कालसूत्रं च महानरकमेव च ॥ ९३ ॥
संजीवनमहावीची तपनं सांप्रपातनम् । संघातं च सकाकोलं कुल्मलं प्रतिमृत्तिकम् ॥ ९४ ॥
लोहशङ्कुमृधीशं च पन्थानं शाल्मलीं नदीम् । असिपत्रं वनं चैव लोहवारकमेव वै ॥ ९५ ॥
यो हिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया । संजीवंश्च मृतश्चैव न क्वापि सुखमेधते ॥ ९६ ॥
यो बन्धनवधक्लेशान् प्राणिनां न चिकीर्षति । स सर्वस्य हितं प्रेम सुखमानन्त्यमश्नुते ॥ ९७ ॥
यद्ध्यायति तत्कुरुते रतिं बध्नाति यत्र च । तदवाप्नोति यत्नेन यो हिनस्ति न किंचन ॥ ९८ ॥
स्कन्द०—यथैव मरणाद्भितिरस्मदादिवपुष्मताम् । ब्रह्मादिकीटकान्तानां तथा मरणतो भयम् ॥ ९९ ॥
धर्मो जीवदयातुल्यो न क्वापि जगतीतले । तस्मात्सर्वप्रयत्नेन कार्या जीवदया नृभिः ॥ १०० ॥
एकस्मिन् रक्षिते जीवे त्रैलोक्यं रक्षितं भवेत् । घातिते घातितं तद्वत्तस्माज्जीवान्न मारयेत् ॥ १०१ ॥
अहिंसा परमो धर्म इहोक्तः सर्वसूरिभिः । तस्मान्न हिंसा कर्तव्या नरैर्नरकभीरुभिः ॥ १०२ ॥
न हिंसासदृशं पापं त्रैलोक्ये सचराचरे । हिंसको नरकं गच्छेत् स्वर्गं गच्छेदहिंसकः ॥ १०३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आत्मनश्च परस्यापि यः करोत्यन्तरं नरः । तस्य भिन्नदृशो मृत्योर्विदधे भयमुल्बणम् ॥ १६४ ॥
अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् । अर्चयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा ॥ १६५ ॥
सर्वात्मना न हिंसन्ति भूतग्रामेषु किंचन । उच्चावचेषु दैत्येन्द्र ! मद्भावविधृतस्पृहा ॥ १६६ ॥
यत्र तत्र च मद्भक्ताः प्रशान्ताः समदर्शनाः । साधवः समुदाचाराः पूजयन्त्यपि कीटकान् ॥ १६७ ॥
न यस्य स्वपर इति चित्ते स्वात्मनि वा भिदा । सर्वभूतसमः शान्तः स वै भागवतोत्तमः ॥ १६८ ॥
कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् । सत्याचारोऽनवद्यात्मा स नः सर्वोपकारकः ॥ १६९ ॥
न स्तुवीत न निन्देत कुर्वतः साध्वसाधु वा । आत्मरामोऽनया वृत्त्या विचरेज्जडवन्मुनिः ॥ १७० ॥
विमुञ्चति यदा कामान्मानवो मनसिस्थितान् । तर्ह्येवपुण्डरीकाक्ष ! भगवत्त्वाय कल्पते ॥ १७१ ॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिञ्चनः । अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः ॥ १७२ ॥
स्त्रीणां वा स्त्रीसङ्गिनां सङ्गं त्यक्त्वा त्वात्मवान् । क्षमे विविक्त आसीनश्चिन्तयेन्मामतन्द्रितः ॥ १७३ ॥
यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम् । समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥ १७४ ॥
सर्वभूतेषु यः पश्येद्भगवद्भावमानतः । भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ १७५ ॥
गृहीत्वा पिण्डियैरर्थान्यो न द्वेष्टि न हृष्यति । विष्णोर्मायामयं पश्यन्स वै भागवतोत्तमः ॥ १७६ ॥
रागादिदूषिते चित्तेऽनास्पदी मधुसूदनः । रतिं न कुरुते हंसः कदाचित्कर्दमाम्भसि ॥ १७७ ॥
न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः । सज्जतेऽस्मिन्न हन्ता वो देहे वै स हरेः प्रियः (?) ॥ १७८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गीतायाम्— विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके तु पण्डिताः समदर्शिनः ॥ १७९ ॥
आदित्यपु०— एकोपि बहुधास्मीति लीलया केवलः शिवः । ब्रह्मविष्ण्वादिरूपेण देवदेवो महेश्वरः ॥ १८० ॥
पृष्टो ब्रह्मादिभिर्देवैः कस्त्वं देवेति शङ्करः । अब्रवीदहमेवैको नान्यः कश्चिदिति श्रुतिः ॥ १८१ ॥
सृजन्ते बहवो रुद्रा अनन्ताश्च चतुर्मुखाः । नारायणाश्च संख्याता देवदेवेन शम्भुना ॥ १८२ ॥
न तस्मादधिकःकश्चिन्नाणीयानपि कश्चन । तेनेदमखिलं पूर्णं शङ्करेण महात्मना ॥ १८३ ॥
पृथिव्यां तिष्ठति विभुः पृथिवी वेत्ति नैव तम् । रूपं च पृथिवी तस्य तस्मै भूतात्मने नमः ॥ १८४ ॥
अप्सु तिष्ठति नैवापस्तं विदुः परमेश्वरम् । आपो रूपं च यस्यैवं नमस्तस्मै जलात्मने ॥ १८५ ॥
योऽग्नौ तिष्ठत्यमेयात्मा न तं वक्ति कदाचन । अग्निरूपं भवेद्यस्य तस्मै वह्न्यात्मने नमः ॥ १८६ ॥
तिष्ठत्यजस्रं यो वायौ न वायुर्वेत्ति तं हरम् । वायुर्यस्य भवेद्रूपं तस्मै वाय्वात्मने नमः ॥ १८७ ॥
वैष्णवानां सहस्रेभ्यः शिवभक्तो विशिष्यते । यदि पापरतात्क्रूरःस्वाश्रमाचारवर्जितः॥ १८८ ॥
प्रसङ्गात्कौतुकाल्लोभाद्भयादज्ञानतोऽपि वा । हर इत्युच्चरन्मर्त्यः सर्वपापैः प्रमुच्यते ॥ १८९ ॥
यज्ञेऽप्यहिंसैव नास्ति प्राणिवधा यज्ञे ध्रुवम् । अहिंसैव हि भूतानां सदा यज्ञो युधिष्ठिर ! ॥ १९० ॥
शुकसंवादे— सत्यं यूपं तपो ह्यग्निः प्राणाःसमाधयो मताः । अहिंसामाहुतिं दद्यादेष यज्ञः सनातनः ॥ १९१ ॥
तपोऽग्नौ जीवकुण्डस्थे दममारुतदीपिते । असत्कर्मसमित्क्षेपैरग्निहोत्रं कुरूत्तम ! ॥ १९२ ॥
विष्णु पु०— नैतद्युक्तिसहं वाक्यं हिंसा धर्माय नेष्यते । हवींष्यनलदग्धानि फलायेत्यर्भकोदितम् ॥ १९३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हिंसितस्य पशोर्यज्ञे स्वर्गादीष्यते बालिशैः । स्वपिता यजमानेन किन्तु कस्मान्न हन्यते ? ॥ १९४ ॥
तृप्तये जायते पुंसां भुक्तमन्येन चेत्ततः । दद्याच्छ्राद्धं समायान्नं न वहेयुः प्रवासिनः ॥ १९५ ॥
जनश्रद्धेयमित्येतदवगम्य ततो ध्रुवम् । उपेक्षा श्रेयसी वाक्यं रोचतां यन्मये रतिम् (?) ॥ १९६ ॥
न ह्याप्तवादानभसो निपठन्ति महासुराः । युक्तिमद्वचनं ग्राह्यं मयाऽन्यैश्च भवद्विधैः (?) ॥ १९७ ॥
स्कन्दे— वृक्षांश्छित्त्वा पशून्हत्वा कृत्वा रुधिरकर्दमम् । दग्ध्वा वह्नौ तिलाजादि चित्रं स्वर्गोऽभिलष्यते ॥ १९८ ॥
मिता०— चण्डालो जायते यज्ञकरणाच्छूद्रभिक्षितात् । यज्ञार्थं लब्धमददद्भासः काकोपि वा भवेत् ॥ १९९ ॥
मनु०— यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति । स याति भासतां विप्र काकतां वा शतं समाः ॥ २०० ॥
नहि यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत धर्मवित् । यजमानो हि भिक्षित्वा चण्डालः प्रेत्य जायते ॥ २०१ ॥
ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते । ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः ॥ २०२ ॥
अधीत्य चतुरो वेदान्साङ्गोपाङ्गान्सलक्षणान् । शूद्रात्प्रतिग्रहं कृत्वा खरो भवति ब्राह्मणः ॥ २०३ ॥
खरो द्वादश जन्मानि षष्टि जन्मानि शूकरः । श्वानः सप्तति जन्मानि इत्येवं मनुरब्रवीत् ॥ २०४ ॥
वशिष्ठ०— शूद्रान्नेनोदरस्थेन यदि कश्चिद्द्विजो मृतः । स भवेच्छूकरो ग्राम्यस्तस्य वा जायते कुले ॥ २०५ ॥
स्कन्द०— शूद्रान्नं शूद्रसम्पर्कः शूद्रेण च सहासनम् । शूद्राद्विद्यागमःकश्चिज्ज्वालयन्तमपि पातयेत् ॥ २०६ ॥
शूद्रादाहृत्य निर्वापं ये पचन्त्यबुधा द्विजाः । ते यान्ति नरकं घोरं ब्रह्मतेजोविवर्जिताः ॥ २०७ ॥
विष्णु०— विष्णुभक्तिः केशवार्चा गृहे यस्य न तिष्ठति । तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं स्मृतम् ॥ २०८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवैष्णवगृहे भुक्त्वा पीत्वा चाज्ञानतो यदि । शुद्धाश्चान्द्रायणेनोक्ता ऋषिभिस्तत्त्वदर्शिभिः ॥ २०९ ॥
अङ्गि०— ब्राह्मणान्ने दरिद्रत्वं क्षत्रियान्ने पशुस्तथा । वैश्यान्नेन तु शूद्रत्वं शूद्रान्ने नरकं ध्रुवम् ॥ २१० ॥
राजप्रतिग्रहदग्धानां ब्राह्मणानां युधिष्ठिर ! । शटितानामिव बीजानां पुनर्जन्म न विद्यते ॥ २११ ॥
राजप्रतिग्रहो घोरो मधुस्वादो विषोपमः । पुत्रमांसं वरं भक्ष्यं न तु राज्ञः प्रतिग्रहः ॥ २१२ ॥
मनु०— दशसूनासमं चक्रं दशचक्रसमो ध्वजः । दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥ २१३ ॥
दश सूनासहस्राणि यो वाहयति सौनिकः । तेन तुल्यो स्मृतो राजा घोरस्तस्य प्रतिग्रहः ॥ २१४ ॥
एतद्विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः । न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयोऽभिकाङ्क्षिणः ॥ २१५ ॥
न शूद्राय मतिं दद्यात् नोच्छिष्टं न हविष्कृतम् । न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥ २१६ ॥
योऽस्य धर्ममाचष्टे यश्चैवादिशति व्रतम् । सोऽसंवृतं नामतः सह तेनैव गच्छति ॥ २१७ ॥
न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति । नास्याधिकारो धर्मेऽस्ति न धर्मात्प्रतिषेधनम् ॥ २१८ ॥
शक्तेनापि हि शूद्रेण न कार्यो धनसंग्रहः । शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते ॥ २१९ ॥
इतिहा०— यो राज्ञः प्रतिगृह्णाति ब्राह्मणो लोभमोहितः । तमिस्रादिषु घोरेषु नरकेषु स पच्यते ॥ २२० ॥
अर्थसम्पद्विमोहाय विमोहो नरकाय च । तस्मादर्थमनर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत् ॥ २२१ ॥
यस्य धर्मार्थमर्थेहा तस्यानीहैव शोभना । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ २२२ ॥
सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः । छेत्तारः संशयानां च लोभादेते व्रजन्त्यधः ॥ २२३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भाग०— यशो यशस्विनां शुभ्रं श्लाघा ये गुणिनां गुणाः । लोभः स्वल्पोपि तान्हन्ति श्वित्रो रूपमिवेप्सितम् ॥ २२४ ॥
असन्तुष्टस्य विप्रस्य तेजो विद्या तपो यशः । स्रवन्तीन्द्रियलौल्येन ज्ञानं चैवावकीर्यते ॥ २२५ ॥
भिद्यन्ते भ्रातरो दाराः पितरः सुहृदस्तथा । एकयाऽर्थेच्छया स्निग्धाः सद्यः सर्वेरयकृताम् (?) ॥ २२६ ॥
अर्थेनाल्पीयसा ह्येते संरब्धा दीर्घमन्यवः । त्यजन्त्यमून्त्वथा घ्नन्ति सहसोत्सृज्य सौहृदम् ॥ २२७ ॥
सन्तुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखम् । कुतस्तत्कामलोभेन धावतोऽर्थेहया दिशः ॥ २२८ ॥
प्रायेणार्थः कदर्याणां न सुखाय कदाचन । इह चात्मनस्तापाय मृतस्य नरकाय वै ॥ २२९ ॥
मनु०— यदा भावेन भवति सर्वभावेषु निःस्पृहः । तदा सुखमवाप्नोति प्रेत्य वेह च शाश्वतम् ॥ २३० ॥
विष्णु०— यावतः कुरुते जन्तुः सम्बन्धान्मनसः प्रियान् । तावन्तोऽस्य निखान्यन्ते हृदये शोकशङ्कवः ॥ २३१ ॥
यद्यद्गृहे तन्मनसि यत्र तत्रावतिष्ठति । माशदाहोपकरणं कुतस्तत्रैव तिष्ठति (?) ॥ २३२ ॥
यद्यत्प्रीतिकरं पुंसो वस्तु मैत्रेय ! जायते । तदेव दुःखवृक्षस्य बीजत्वमुपगच्छति ॥ २३३ ॥
कलत्रपुत्रभृत्यादिगृहक्षेत्रधनादिभिः क्रियते न तथा भूरि सुखं पुंसो यथासुखम् ॥ २३४ ॥

## राज्ञोऽप्यहिंसायाम् ॥

मिता०— पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन् । सर्वदानाधिकं यस्मात्प्रजानां परिपालनम् ॥ २३५ ॥
अरक्ष्यमाणाः कुर्वन्ति यत्किञ्चित्किल्बिषं प्रजाः । तस्मान्नरपतेरर्द्धं यस्माद्गृणात्यसौ करम् ॥ २३६
अधर्मदण्डनं स्वर्गकीर्त्तिलोकविनाशनम् । सम्यक्त्वदण्डनं राज्ञा स्वर्गकीर्त्तिजयावहम् ॥ २३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनु०— अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चैव गच्छति ॥ २३८ ॥
यस्तु धर्मेण कार्याणि नेह कुर्यान्नराधिपः । अचिरात्तं दुरात्मानं वशीकुर्वन्ति शत्रवः ॥ २३९ ॥
कामक्रोधौ च संयम्य योऽर्थान्धर्मेण पश्यति । प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः ॥ २४० ॥
अभयस्य हि यो दाता स पूज्यः सततं नृपः । सत्रं हि वर्द्धते तस्य सदैवाभयदक्षिणम् ॥ २४१ ॥
योऽरक्षन्बलिमादत्ते करं शुल्कं च पार्थिवः । प्रतिभोगं च दण्डं च स सद्यो नरकं व्रजेत् ॥ २४२ ॥
अरक्षितारं राजानं बलिषड्भागहारिणम् । तमाहुः सर्वलोकानां समग्रमलहारिणम् ॥ २४३ ॥
न्यायो धर्मो दर्शनानि तीर्थानि सुखसम्पदः । यस्याधारे प्रवर्तन्ते स जीयात्पृथिवीपतिः ॥ २४४ ॥
मिता०— वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम् । पन्था देयो नृपस्तेषां मान्यःस्नातस्तु भूपतेः ॥ २४५ ॥

## अथ दाने

इति०— नान्नदानात्परं दानं किञ्चिदस्ति नरेश्वर ! । अन्नेन धार्यते कृत्स्नं चराचरमिदं जगत् ॥ २४६ ॥
पद्मपु०— सर्वेषामेव भूतानामन्ने प्राणाः प्रतिष्ठिताः । तेनान्नदो विशांश्रेष्ठ ! प्राणदाता स्मृतो बुधैः ॥ २४७ ॥
प्राह वैवस्वतो राजा राजानं केसरिध्वजम् । च्यवन्तं स्वर्गलोकात्तं कारुण्येन विशांवर ! ॥ २४८ ॥
ददस्वान्नं ददस्वान्नं ददस्वान्नं नराधिप ! । कर्मभूमौ गतो भूयो यदि स्वर्गत्वमिच्छसि ॥ २४९ ॥
मिता०— दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः । याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः ॥ २५० ॥
इति— बह्वप्यश्रद्धया दत्तं नष्टमाहुर्मनीषिणः । वार्यपि श्रद्धया दत्तमानन्त्यायोपकल्पते ॥ २५१ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिता०— देवतानां गुरूणां च मातापित्रोस्तथैव च । पुण्यं देयं प्रयत्नेन नापुण्यं तूदितं क्वचित् ॥ २५२ ॥
इति०— दुःखं ददाति योऽन्यस्य भूयो दुःखं च विन्दति । तस्मान्न कस्यचिद्दुःखं दातव्यं दुःखभीरुणा ॥ २५३ ॥
तुर्यार०— दानान्न दुष्करतरं पृथिव्यामस्ति किञ्चन । अर्थे हि महती तृष्णा स च दुःखेन लभ्यते ॥ २५४ ॥
पात्रे स्वल्पमपि दानं कालं दानं युधिष्ठिर ! । मनसा सुविशुद्धेन प्रेत्यानन्तफलं स्मृतम् ॥ २५५ ॥
पात्रे दत्त्वा दानं प्रियाण्युक्त्वा च भारत ! । अहिंसानिरतः स्वर्गं गच्छेदिति मतिर्मम ॥ २५६ ॥

## अथ पात्रे

मिता०— न विद्यया केवलया तपसा वापि पात्रता । यत्र वृत्तं समेष्येत तद्धि पात्रं प्रकीर्त्तितम् ॥ २५७ ॥
विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः । गृहणन्प्रदातारमधो नयत्यात्मनमेव च ॥ २५८ ॥
प्रतिग्रहसमर्थोऽपि नादत्तो य प्रतीयहम् । य लोका दानशीलानां स तानाप्नोति पुष्कलान् (?) ॥ २५९ ॥
पुनर्भोजनमध्यानं भाराध्ययनमैथुनम् । दानं प्रतिग्रहं होमं श्राद्धभुक् त्वष्ट वर्जयेत् ॥ २६० ॥
कर्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निब्रह्मचारिणः । पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसम्पदे ॥ २६१ ॥
विष्णु— पापेऽप्यपापपुरुषोऽप्यधिते प्रियाणि यः । मैत्रीद्रवान्तःकरणस्तस्य मुक्तिः करे स्थिता ॥ २६२ ॥
ये कामक्रोधलोभादीन्वीतरागा न कुर्वते । सदाचारस्थितास्तेषामतुर्भावैर्धृतामहे (?) ॥ २६३ ॥
धर्मशास्त्रे— किञ्चिद्वेदमयं पात्रं किञ्चित्पात्रं तपोमयम् । पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे ॥ २६४ ॥
शूद्रान्नेनोदरस्थेन यदि कश्चिन्मृतो द्विजः । स भवेच्छूकरो ग्राम्यस्तस्य वा जायते कुले ॥ २६५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ये शान्तदान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधान्निवृत्ताः ।
प्रतिगृहे संकुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः ॥ २६६ ॥
इति०— सर्वहिंसानिवृत्ताश्च नित्यं सर्वसहाश्च ये । सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ २६७ ॥
साधूनां दर्शनं स्पर्शः कीर्तनं स्मरणं तथा । तीर्थानामिव पुण्यानां सर्वमेवेह पावनम् ॥ २६८ ॥
साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः कालतः फलते तीर्थं सद्यः साधुसमागमः ॥ २६९ ॥
आरोहस्व रथे पार्थ ! गाण्डीवं च करे कुरु । निर्जितां मेदिनीं मन्ये निर्ग्रन्थो यदि संमुखः ॥ २७० ॥
श्रमणस्तुरगो राजा मयूरः कुञ्जरो वृषः । प्रस्थाने वा प्रवेशे वा सर्वे सिद्धिकरा मताः ॥ २७१ ॥
पद्मिनी राजहंसाश्च निर्ग्रन्थाश्च तपोधनाः । यं देशमुपसर्पन्ति तत्र देशे शुभं वदेत् ॥ २७२ ॥

## अथापात्रे.

बृहस्पतिस्मृतौ—विप्रो गां च हिरण्यं च वस्त्रमश्वं महीतलम् । अविद्वान्प्रतिगृह्णानो भस्मीभवति काष्ठवत् ॥ २७३ ॥
मिता०— धूर्ते मल्ले निमित्ते च कुवैद्ये कितवे शते । भाटचारणचौरेषु दत्तं भवति निष्फलम् ॥ २७४ ॥
मनु०— नश्यन्ति हव्यकव्यानि नराणामविजानताम् । भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः ॥ २७५ ॥
न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् । भोजनार्थं हि ते शंसन्वान्ताशीत्युच्यते बुधैः ॥ २७६ ॥
सन्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव । अमृतस्येव चाकाङ्क्षेदपमानस्य सर्वथा ॥ २७७ ॥

For Private and Personal Use Only

हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतम् । अविद्वान्प्रतिगृह्णानो भस्मीभवति दारुवत् ॥ २७८ ॥
एककालं चरेद्भैक्ष्यं न प्रसज्येत विस्तरम् । भैक्षे प्रसक्तोहि यतिः प्रसज्येद्विषयेष्वपि ॥ २७९ ॥
अलाभे न विषादी स्याल्लाभश्चैनं न हर्षयेत् । प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥ २८० ॥
अल्पाशाभ्यवहारेण रहःस्थानासनेन च । ह्रियमाणानि विषयैरिन्द्रियाणि निवारयेत् ॥ २८१ ॥
अभिपुजितलाभांस्तु जुगुप्सेतैव सर्वशः । अभिपूजितलाभैस्तु यतिर्मुक्तोऽपि वञ्च्यते ॥ २८२ ॥
जीवितात्ययमापन्नो यो नमस्ति यतस्ततः । आकाशमिव पङ्केन न स पापेन लिप्यते ॥ २८३ ॥
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् । भैक्षेण व्रतिनो वृत्तिरुपवाससमा मता ॥ २८४ ॥
आदित्य०— भैक्षेण वर्त्तनं नित्यं नैकान्नादी भवेद्व्रती । उपवाससमा भिक्षा प्रोक्ता वै ब्रह्मचारिणाम् ॥ २८५ ॥
याज्ञव०— ब्रह्मचर्यस्थितो नैकमन्नमद्यादनापदि । दन्तधावनगीतादि ब्रह्मचारी विवर्जयेत् ॥ २८६ ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया । नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ २८७ ॥
भाग०—अलब्धा न विषीदेत कालेऽकालेऽशनं क्वचित् । लब्धा न हृष्येद्वृत्तिमानुभयं दैवतन्त्रितम् ॥ २८८ ॥
चरेन्माधुकरीं वृत्तिमपि ध्वान्तकुलादपि । एकान्नं नैव भुञ्जीत बृहस्पतिसमादपि ॥ २८९ ॥
अवधूतां च पूतां च मूर्खाद्यैः परिनिन्दिताम् । चरेन्माधुकरीं वृत्तिं सर्वपापप्रणाशिनीम् ॥ २९० ॥
नीली पटे जलं तक्रे तथा गौर्म्लेच्छमन्दिरे । भिक्षान्नं पञ्चगव्यूतं पवित्राणि युगे युगे ॥ २९१ ॥
भृङ्गाघ्रातं यथा पुष्पं वत्सपीतं यथा पयः । भिक्षान्नं पञ्चगव्यूतं पवित्राणि युगे युगे ॥ २९२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# अथातिथौ.

मनु०— एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ २९३ ॥
कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशयेत् । भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ॥ २९४ ॥

विष्णुपु०— अतिथिर्यस्य भग्नाशो गृहाद्यात्यन्यतोमुखः । स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ २९५ ॥
दत्त्वा त्वर्घ्यं विशिष्टेभ्यः क्षुधितेभ्यस्तथा गृही । प्रशस्तं शुद्धपात्रेभ्यो भुञ्जीताकुपितो नृपः ॥ २९६ ॥
धाता प्रजापतिः शक्रो वह्निर्वसुगणोऽर्यमा । प्रविश्यातिथिमेते वै भुञ्जतेऽन्नं नरेश्वर ! ॥ २९७ ॥
तस्मादतिथिपूजायां यतेत सततं नरः । स केवलमघं भुङ्क्ते यो ह्यतिथिं विना ॥ २९८ ॥

मिताक्ष०— सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च । भोजयेद्वाऽऽगतान्काले सखिसम्बन्धिबान्धवान् ॥ २९९ ॥

इतिहा०— सत्यं शौचं तपोऽधीतं दत्तमिष्टं श्रुतं तथा । तस्य सर्वमिदं व्यर्थमतिथिं यो न पूजयेत् ॥ ३०० ॥

पद्मपु०— मूर्खो वा पण्डितो वाथ श्रोत्रियः पतितोऽथवा । ब्रह्मतुल्योऽतिथिर्वैश्य ! मध्याह्ने यः समागतः ॥ ३०१ ॥
पथि श्रान्ताय विप्राय अन्यस्मै क्षुधिताय वा । प्रयच्छन्त्यन्नपानीयं ते नाके चिरवासिनः ॥ ३०२ ॥
अतिथिर्विमुखो यस्य न याति गृहमागतः । मध्याह्ने वैश्य ! सायं वा स न याति यमालयम् ॥ ३०३ ॥
नास्ति नास्ति वचः श्रुत्वा त्यक्त्वाऽऽशामतिथिर्व्रजन् । आजन्मसञ्चितं पुण्यं गृह्णाति गृहमेधिनः ॥ ३०४ ॥
नास्त्यतिथिसमो बन्धुर्नास्त्यतिथिसमं धनम् । नास्त्यतिथिसमो धर्मो नास्त्यतिथिसमो हितः ॥ ३०५ ॥

विवेक वि०— आर्तस्तृष्णाक्षुधाभ्यां यो वित्रस्तो वा स्वमन्दिरात् । आगतः सोऽतिथिः पूज्यो विशेषेण मनीषिणा ॥ ३०६ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोविदो वाऽथवा मूर्खो मित्रं वा यदि वा रिपुः । निदानं स्वर्गभोगानां भोजनावसरेऽतिथिः ॥ ३०७ ॥

## अथ शीले

मैथुनं ये न सेवन्ते ब्रह्मचारिदृढव्रताः । ते संसारसमुद्रस्य पारं गच्छन्ति सुव्रताः ॥ ३०८ ॥

ब्रह्मचर्येण शुद्धस्य सर्वभूतहितस्य च । पदे पदे यज्ञफलं प्रस्थितस्य युधिष्ठिर ! । ३०९ ॥

एकरात्र्युषितस्यापि यागतिर्ब्रह्मचारिणः । न सा शक्रसहस्रेण वक्तुं शक्या युधिष्ठिरः ॥ ३१० ॥

ब्रह्मचर्यं भवेन्मूलं सर्वेषां धर्मचारिणाम् । ब्रह्मचर्यस्य भङ्गेन व्रताः सर्वे निरर्थकाः ॥ ३११ ॥

ऋतुकाले व्यतिक्रान्ते यस्तु सेवेत मैथुनम् । ब्रह्महत्याफलं तस्य सूतकं च दिने दिने ॥ ३१२ ॥

ग्रहणेऽप्यथ संक्रान्तावमावास्यां चतुर्दश्याम् । नरश्चाण्डालयोनिः स्यात्तैलाभ्यङ्गे स्त्रीसेवने ॥ ३१३ ॥

मनु०— ऋतुकालमतिक्रम्य योऽभिगच्छति मैथुनम् । स एव ब्रह्महा नाम हतं ब्रह्म तदात्मजम् ॥ ३१४ ॥

अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् । ब्रह्मचारी भवेन्नित्यगस्पृष्टो स्नातको द्विजः (?) ॥ ३१५ ॥

विष्णु०—— चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा । पर्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥ ३१६ ॥

तैलस्त्रीमांससंभोगी पर्वस्वेतेषु वै पुमान् । विण्मुत्रभोजनं नाम प्रयाति नरकं मृतः ॥ ३१७ ॥

अशेषपर्वस्वेतेषु तस्मात्संयमिभिर्बुधैः । भाव्यं सच्छास्त्रदेवार्चाध्यानजापपरैर्नरैः ॥ ३१८ ॥

उदक्पथानमयस्तः श्रुतह्यानूतसंप्लवम् । तेऽसंप्रयोगील्लोभस्य मैथुनस्य च वर्जनात् ( ? ) ॥ ३१९ ॥

इतिहासे—— येऽभिगच्छन्ति रागान्धा नरा नारीं रजस्वलाम् । पर्वस्वप्सु दिवा चैव ते वै निरयगामिनः ॥ ३२० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विष्णुभक्तिचन्द्रोदये—एकादश्यष्टमी चैव पक्षयोश्च चतुर्दशी । शिवस्य तिथयःप्रोक्ता मुनिभिः सौनिकादिभिः ॥ ३२१ ॥

वाशिष्टस्मृ०—श्राद्धं दत्त्वा च भुक्त्वा च मैथुनं योऽधिगच्छति । भवन्ति पितरस्तस्य तन्मासं रेतसो भुजः ॥ ३२२ ॥

मिता०— शूद्रां तु ब्राह्मणो गत्वा मासं मासार्द्धमेव वा । गोमूत्रयावकाहारस्तिष्ठेत्तत्पापमोक्षकः ॥ ३२३ ॥

रजकव्याधशैलूषवेणुचर्मोपजीवनाः । एतासु ब्राह्मणो गत्वा चरेच्चान्द्रायणद्वयम् ॥ ३२४ ॥

कथञ्चिद्ब्राह्मणीं गच्छेत्क्षत्रियो वैश्य एव वा । कृच्छ्रसांतपनं वा स्यात्प्रायश्चित्तविशुद्धये ॥ ३२५ ॥

परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च । अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ॥ ३२६ ॥

यत्करोत्येकरात्रेण वृषलीसेवनाद्द्विजः । तद्भैक्षभुग् जपन्नित्यं त्रिभिर्वर्षैव्यपोहति ॥ ३२७ ॥

रेतःसिक्त्वा कुमारीषु स्तयोनिष्वन्त्यजासु च । सपिण्डापत्यदारेषु प्राणत्यागो विधीयते (?) ॥ ३२८ ॥

भाग०— यास्तामिश्रान्धतामिश्रा रौरवाद्याश्च यातनाः । भुङ्क्ते नरो वा नारी वा मिथः सङ्गेन निर्मिताः ॥ ३२९ ॥

याज्ञव०— प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा । ग्रहणान्तिकमित्येके केशान्तश्चैव षोडशे ॥ ३३० ॥

बहूनि हि सहस्राणि कुमारब्रह्मचारिणाम् । दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् ॥ ३३१ ॥

एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः । स गच्छत्युत्तमं स्थानं न चेह जायते पुनः ॥ ३३२ ॥

आदि० गाङ्गेय उ०—अद्य प्रभृति मे दाश ! ब्रह्मचर्यं भविष्यति । अपुत्रस्यापि मे लोका भविष्यन्त्यक्षया दिवि ॥ ३३३ ।

तुर्यार० कोटराग्निर्यथाऽशेषं समूलं पादपं दहेत् । धर्मार्थिनां तथाऽल्पोऽपि रागरोषो विनाशयेत् ॥ ३३४ ॥

कामलोभग्राहवतीं पञ्चेन्द्रियजलां नदीम् । नावं धृतिमहो ! कृत्वा जन्मदुर्गाणि संतर ॥ ३३५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिहा०— ये तपसा प्रतप्यन्ते कौमारव्रतचारिणः। जितेन्द्रिया जितक्रोधा दुर्गाण्यतितरन्ति ते ॥ ३३६ ॥
दमं निश्रेयसं प्राहुर्वृद्धा निश्चयदर्शिनः। ब्राह्मणस्य विशेषेण दमो धर्मः सनातनः ॥ ३३७ ॥
ये केचिन्नियमा लोके याश्च धर्मश्रुतिक्रियाः। सर्वयज्ञफलं चैव दमस्तेभ्यो विशिष्यते ॥ ३३८ ॥
किमरण्येनादान्तस्य दान्तस्य तु किमाश्रमैः। यत्र यत्र वसेद्दान्तस्तदरण्यं तदाश्रमः ॥ ३३९ ॥

वनेऽपि दोषाः प्रभवन्ति रागिणां गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः।
अकुत्सिते कर्मणि यः प्रवर्तते निवृत्तरागस्य गृहं तपोवनम् ॥ ३४० ॥

न शब्दशास्त्राभिरतस्य मोक्षो न चैव रम्यावसथप्रियस्य।
न भोजनाच्छादनतत्परस्य न लोकचित्तग्रहणे रतस्य ॥ ३४१ ॥

दमे कृते सर्वमतं प्रजानां दमाद्विशिष्टं न च वस्तु किञ्चित्।
वेदाश्च शास्त्राणि च सर्वमेतद्दमेन हीनस्य निरर्थकानि ॥ ३४२ ॥

कामक्रोधौ विनिर्जित्य किमरण्येन करिष्यति ?। अथवा तावनिर्जित्य किमरण्येन करिष्यति ? ॥ ३४३ ॥
मातृवत्परदाराणि परद्रव्याणि लोष्टुवत्। आत्मवत्सर्वभूतानि यः पश्यति स पश्यति ॥ ३४४ ॥
पद्म पु०— मातृवत्परदारान्ये संपश्यन्ति नरोत्तमाः। न ते यान्ति विशांश्रेष्ठ ! कदाचिद्यमयातनाम् ॥ ३४५ ॥
मनसापि परेषां यः कलत्राणि न सेवते। स हि लोकद्वयेनेव तेन वैश्य ! धरा धृता ॥ ३४६ ॥
तस्माद्धर्मान्वितैस्त्याज्यं परदारोपसेवनम्। नयन्ति परदारास्तु नरकानेकविंशतिम् ॥ ३४७ ॥ प० ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेश्याया दर्शने स्नानमुपवासं च मैथुने । सप्तरात्रेण शूद्रत्वं मासेन पतितो भवेत् ॥ ३४८ ॥

ताम्बूलं वस्त्रसूक्ष्माणि स्त्रीकथेन्द्रियपोषणम् । दिवा निद्रा सदा क्रोधो यतीनां पतनानि षट् ॥ ३४९ ॥

आदि० पु०— द्यूतं जनपरीवादं स्त्रीप्रेक्षा लम्भनं तथा । गन्धं माल्यं रसं छत्रं वर्जयेद्दन्तधावनम् ॥ ३५० ॥

याज्ञव०— ब्रह्मचर्यस्थितो नैकमन्नमद्यादनापदि । दन्तधावनगीतादि ब्रह्मचारी विवर्जयेत् ॥ ३५१ ॥

भाग०— न च्छिन्द्यान्नखलोमानि कक्षोपस्थगतान्यपि । रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयम् ॥ ३५२ ॥

ब्राह्मणस्य देहोऽयं कृतकामाय नेष्यते । कृच्छ्रायते एतेनेष्टः प्रेत्यानन्तसुखाय वै ॥ ३५३ ॥

मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् । बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ ३५४ ॥

शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् । ज्ञानं दया श्रुतात्मत्वं सत्यं च ब्रह्मलक्षणम् ॥ ३५५ ॥

मिता०— मृते जीवति वा पत्यौ या नान्यमुपगच्छति । सेह कीर्तिमवाप्नोति मोदते च मया सह ॥ ३५६ ॥

पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ॥ ३५७ ॥

या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् । सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत् ॥ ३५८ ॥

क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥ ३५९ ॥

नीचाभिगमनं गर्भपातनं भर्तृहिंसनम् । विशेषपतनीयानि स्त्रीणामेतानि निश्चितम् ॥ ३६० ॥

वृह०— व्रतोपवासनिरता ब्रह्मचर्ये व्यवस्थिता । दमदानरता नित्यमपुत्रापि दिवं व्रजेत् ॥ ३६१ ॥

मनु०— मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता । स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥ ३६२ ॥

॥१३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कामं हि क्षिपयेद्देहं पुष्पमूलफलैः शुभैः । न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु ॥ ३६३ ॥
अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते । सेह निन्दामवाप्नोति पतिलोकाच्च हीयते ॥ ३६४ ॥
स्कन्द पु०— शीलभङ्गेन दुर्वृत्ताः पातयन्ति कुलत्रयम् । पितुर्मातुस्तथा पत्युरिहामुत्र च दुःखिताः । ३६५ ॥
पतिव्रतायाश्चरणो यत्र यत्र स्पृशेद्भुवम् । तत्रेति भूमिर्मन्येत नात्र भारोऽस्मि पावनी ॥ ३६६ ॥
पत्यौ मृतेऽपि या योषिद्वैधव्यं पालयेत्कचित् । सा पुनः प्राप्य भर्तारं स्वर्गभोगान्समश्नुते ॥ ३६७ ॥
एकाहारः सदा कार्यो न द्वितीयः कदाचन । त्रिरात्रं पञ्चरात्रं वा पक्षव्रतमथापि वा ॥ ३६८ ॥
यवान्नैर्वा फलाहारैः शाकाहारैः पयोव्रतैः । प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं व्रजेत् ॥ ३६९ ॥
पर्यङ्कशायिनी नारी विधवा पातयेद्व्रतम् । तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया ॥ ३७० ॥
पद्मपु०— शीलं रक्ष्यं सदा स्त्रीभिर्दुष्टसङ्गविवर्जनात् । शीलेन हि परः स्वर्गः स्त्रीणां वैश्य ! न संशयः ॥ ३७१ ॥प०।
इयतैव स्त्रियो धन्याः शीलस्य परिरक्षणात् । शीलभङ्गे हि नारीणां यमलोकः सनातनः ॥ ३७२ ॥

न रामतातस्तिसृभिः प्रियाभिर्न सीतया सोऽपि च रामचन्द्रः ।
न रावणस्तत्प्रिययाऽनुयातो दुर्योधनो नैव च भानुमत्या ॥ ३७३ ॥
नानुप्रयातश्च हरिः प्रियाभिस्तद्बान्धवस्तत्प्रिययापि नैव ।
क एष धर्मः प्रविशन्ति वह्नौ नार्योऽधुना कान्तमुपासितुं स्वं ॥ ३७४ ॥

अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च । तस्मात्पुत्रमुखं दृष्ट्वा स्वर्गं गच्छन्ति मानवाः ॥ ३७५ ॥

For Private and Personal Use Only

पुत्रेण जायते स्वर्ग इत्येषा वैदिकी श्रुतिः । अथ पुत्रस्य पुत्रेण स्वर्गलोको महीयते ॥ ३७६ ॥
यदि पुत्राद्भवेत्स्वर्गो दानधर्मो न विद्यते । मुषितस्तर्हि लोकोऽयं दानधर्मो निरर्थकः ॥ ३७७ ॥
बहुपुत्राकुला गोधा ताम्रचुडस्तथैव च । तेषां च प्रथमं स्वर्गः पश्चाल्लोको गमिष्यति ॥ ३७८ ॥

## अथ द्विजत्वे.

ब्राह्मणा ब्रह्मचर्येण यथा शिल्पेन शिल्पिकः । अन्यथा नाममात्रं स्यादिन्द्रगोपककीटवत् ॥ ३७९ ॥
शिल्पमध्ययनं नाम वृत्तं ब्राह्मणलक्षणम् । वृत्तस्थं ब्राह्मणं ब्रूमो नेतरान्वेदजीवकान् ॥ ३८० ॥
ब्रह्मचर्यतपो युक्ता समानलोष्टुकाञ्चनाः । ........................................ ॥ ३८१ ॥
सर्वजातिषु चाण्डालाः सर्वजातिषु ब्राह्मणाः । ब्राह्मणेष्वपि चाण्डालाश्चाण्डालेष्वपि ब्राह्मणाः ॥ ३८२ ॥
शूद्रोऽपि शीलसंपन्नो गुणवान्ब्राह्मणो भवेत् । ब्राह्मणोऽपि क्रियाहीनः शूद्रापत्यसमो भवेत् ॥ ३८३ ॥
चतुर्वेदोऽपि यो भूत्वा चण्डं कर्म समाचरेत् । चण्डालः स तु विज्ञेयो न वेदास्तत्र कारणम् ॥ ३८४ ॥
सत्यं ब्रह्म तपो ब्रह्म ब्रह्म चेन्द्रियनिग्रहः । सर्वभूतदया ब्रह्म एतद्ब्राह्मणलक्षणम् ॥ ३८५ ॥
सत्यं नास्ति तपो नास्ति नास्ति चेन्द्रियनिग्रहः । सर्वभूतदया नास्ति एतच्चाण्डाललक्षणम् ॥ ३८६ ॥
एकवर्णमिदं सर्वं पूर्वमासीद्युधिष्ठिर ! । क्रियाकर्मविभागेन चातुर्वर्ण्यं व्यवस्थितम् ॥ ३८७ ॥
मनु०— अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चैव षट् कर्माण्यग्रजन्मनः ॥ ३८८ ॥
इति०नहुष०उ०—जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन वा । ब्राह्मण्यं केन भवति प्रब्रूह्येतत्सुनिश्चितम् ॥ ३८९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न जातिर्न कुलं तात ! न स्वाध्यायो न च श्रुतम् । कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥ ३९० ॥
अनेके मुनयस्तात ! तिर्यग्योनिषु संभवाः । स्वधर्माचारनिरता ब्रह्मलोकमितो गताः ॥ ३९१ ॥
बहुना किमधीतेन नटस्येव दुरात्मनः । तेनाधीतं श्रुतं तेन यो वृत्तमनुतिष्ठति ॥ ३९२ ॥
तस्माद्विद्धि महाराज ! वृत्तं ब्राह्मणलक्षणम् । चतुर्वेद्यपि दुर्वृत्तः शूद्रात्पापतरः स्मृतः ॥ ३९३ ॥
सत्यं दमस्तपो दानमहिंसेन्द्रियनिग्रहः । दृश्यन्ते यत्र राजेन्द्र ! स ब्राह्मण इति स्मृतः ॥ ३९४ ॥
शूद्रे चैव भवेद्वृत्तं ब्राह्मणे च न विद्यते । शूद्रो वै ब्राह्मणो ज्ञेयो ब्राह्मणः शूद्र एव सः ॥ ३९५ ॥
कामक्रोधानृतद्रोहलोभमोहमदादयः । न सन्ति यत्र राजेन्द्र ! तं देवा ब्राह्मणं विदुः ॥ ३९६ ॥
न जातिकारणं तात ! गुणाः कल्याणहेतवः । वृत्तस्थोऽपि हि चाण्डालः सोऽपि सद्गतिमाप्नुयात् ॥३९७॥
क्षत्रियाणां कुले जातो विश्वामित्रो महामुनिः । तस्मान्नाध्ययनं नापि यजनं विप्रस्य लक्षणम् ॥ ३९८ ॥
मा विषीद नरव्याघ्र ! राक्षसेष्वपि पठ्यते । शिलमध्यनं नाम वृत्तं ब्राह्मणलक्षणम् ॥ ३९९ ॥
मिता०— गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः । प्रवर्तनं हितानां च तत्सर्ववृत्तमुच्यते ॥ ४०० ॥
श्वपाकीगर्भसम्भूतः पारासरो महामुनिः । तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥ ४०१ ॥
कैवर्त्तीगर्भसंभूतो व्यासो नाम महामुनिः । तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥ ४०२ ॥
हरिणीगर्भसंभूत ऋषिशृङ्गो महामुनिः । तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥ ४०३ ॥
मण्डुकीगर्भसंभूतो माण्डव्यश्च महामुनिः । तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥ ४०४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उर्वशीगर्भसंभूतो वशिष्ठश्च महामुनिः । तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥ ४०५ ॥
शफरीगर्भसंभूतो वल्मीकश्च महामुनिः । तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥ ४०६ ॥
क्षत्रवंशसमुत्पन्नो विश्वामित्रो महामुनिः । तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥ ४०७ ॥
कलशीगर्भसंभूतो द्रोणाचार्यो महामुनिः । तपसा ब्राह्मणो जातस्तस्माज्जातिरकारणम् ॥ ४०८ ॥
न तेषां ब्राह्मणी माता न संस्कारश्च विद्यते । तपसा ब्राह्मणा जातास्तस्माज्जातिरकारणम् ॥ ४०९ ॥
शीलं प्रधानं न कुलं प्रधानं कुलेन किं शीलविवर्जितेन ।
बहवो नरा नीचकुलप्रसूताः स्वर्गं गताः शीलमुपेत्य धीराः ॥ ४१० ॥
मनु०— आचाराद्विच्युतो विप्रो न वेदफलमश्नुते । आचारेण तु संयुक्तः संपूर्णफलभाक् स्मृतः ॥ ४११ ॥
आचाराल्लभते चायुराचारादीप्सितप्रजाः । आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ॥ ४१२ ॥
दुराचारो हि पुरुषो लोके भवति निन्दितः । दुःखभागीव सततं व्याधितोऽल्पायुरेव च ॥ ४१३ ॥
संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा । शरीरस्यात्यये चैव संवीक्ष्य वसुधां चरेत् ॥ ४१४ ॥
विष्णुपु०— नोर्ध्वं न तिर्यग् दूरं वा निरीक्षन्पर्यटेद्बुधः । युगमात्रं महीपृष्ठे नरो गच्छेद्विलोकयन् ॥ ४१५ ॥
इति०— बहुना किमधीतेन नटस्येव दुरात्मना । तेनाधीतं श्रुतं सर्वं यो वृत्तमनुतिष्ठति ॥ ४१६ ॥
चतुर्थ०— कर्म शूद्रे कृषिर्वैश्ये सङ्ग्रामः क्षत्रिये स्मृतः । ब्रह्मचर्यतपोमन्त्राः सत्यं चैव द्विजे तथा ॥ ४१७ ॥
वाशि० स्मृ०—दीर्घवैरमसूया चासत्यं ब्राह्मणदूषणम् । पैशुन्यं निर्दयत्वं च जानीयाच्छूद्रलक्षणम् ॥ ४१८ ॥ 

For Private and Personal Use Only

विष्णुपु०— वैश्याः कृषिवणिज्यादि संत्यज्य निजकर्म यत् । शूद्रवृत्त्यां प्रवर्त्स्यन्ते कारुकर्मोपजीविनः ॥ ४१९ ॥
तुर्यारण्य०—यस्तु शूद्रो दमे सत्ये धर्मे च सततोत्थितः । तं ब्राह्मणमहं मन्ये वृत्तेन हि भवेद्द्विजः ॥ ४२० ॥
सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा ! दृश्यते यत्र नागेन्द्र ! स ब्राह्मण इति श्रुतः ॥ ४२१ ॥
शूद्रे चैतद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते । न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥ ४२२ ॥
लक्ष्यते सर्प ! यत्रैतद्वृत्तं स ब्राह्मणः स्मृतः । यत्रैतन्न भवेत्सर्प ! तं शूद्रमिति निर्दिशेत् ॥ ४२३ ॥
जातिरत्र महासर्प ! मनुष्यत्वे विशिष्यते । सङ्करात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः ॥ ४२४ ॥
कृतकृत्याः पुनर्वर्णा यदि वृत्तं न विद्यते । सङ्करस्तत्र नागेन्द्र ! बलवानसमीक्षिता ॥ ४२५ ॥
क्रोधः शत्रुः शरीरस्थो मनुष्याणां द्विजोत्तमः । यः क्रोधलोभौ जयति तं देवा ब्राह्मणं विदुः ॥ ४२६ ॥
यो वदेदिह सत्यानि गुरून्सन्तोषयेदपि । हिंसते च न हिंसेत तं देवा ब्राह्मणं विदुः ॥ ४२७ ॥
जितेन्द्रियो धर्मरतः स्वाध्यायनियतः शुचिः । कामक्रोधौ वशे यस्य तं देवा ब्राह्मणं विदुः ॥ ४२८ ॥
यस्य चात्मसमो लोको धर्मज्ञस्य यशस्विनः । सर्वधर्मेषु च रतस्तं देवा ब्राह्मणं विदुः ॥ ४२९ ॥
योऽध्यापयेदधीयीत यजेद्वा याजयेत वा । दद्यादपि यथाशक्ति तं देवा ब्राह्मणं विदुः ॥ ४३० ॥
ब्रह्मचारी च वदान्यो ह्यधीयीत द्विजोत्तमः । स्वाध्याये वाऽप्रमत्तो वै तं देवा ब्राह्मणं विदुः ॥ ४३१ ॥
धनं तु ब्राह्मणस्याहुः स्वाध्यायं दममार्जवम् । इन्द्रियाणां निग्रहं च शाश्वतं द्विजसत्तम ! ॥ ४३२ ॥
इन्द्रियाणां निरोधेन सत्येन च दमेन च । ब्राह्मणः पदमाप्नोति यत्परं द्विजसत्तम ! ॥ ४३३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्राह्मणः परकीयेषु वर्तमानोऽपि कर्मसु । दाम्भिको दुष्कृतप्रायः शूद्रेण सदृशो भवेत् ॥ ४३४ ॥
कृषिवाणिज्यगोरक्षां राजसेवां चिकित्सितम् । ये विप्राः प्रतिपद्यन्ते न ते कौन्तेय ! ब्राह्मणाः ॥ ४३५ ॥
मनु०— गोरक्षकान्वाणिजकांस्तथा कारुकुशीलवान् । प्रेष्यान्वार्द्धुषिकांश्चैव विप्राञ्शूद्रवदाचरेत् ॥ ४३६ ॥
ये व्यतीताः सुकर्मभ्यः परपिण्डोपजीविनः । द्विजत्वमभिकाङ्क्षन्ते तांश्च शूद्रवदाचरेत् ॥ ४३७ ॥
सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयात् ॥ ४३८ ॥
इतरेषां तु पण्यानां विक्रयादिह कामतः । ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥ ४३९ ॥
पारासरस्मृ०—संवत्सरेण यत्कुर्यात्कैवर्त्तः प्राणिनां वधे । अधोमुखेन काष्ठेन तदह्नैकेन लाङ्गलिः ॥ ४४० ॥
कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः । द्वापरे शङ्खलिखितः कलौ पारासरः स्मृतः ॥ ४४१ ॥ पा० ।
हस्ततलप्रमाणां तु यो भूमिं कर्षति द्विजः । नश्यते तस्य ब्रह्मत्वं शूद्रत्वं त्वभिजायते ॥ ४४२ ॥
यस्तु रक्तेषु दन्तेषु वेदमुच्चरते द्विजः । अमेध्यं तस्य जिह्वाग्रे सूतकं च दिने दिने ॥ ४४३ ॥
इति० ब्राह्मण्यं पुण्यमुत्सृज्य ये द्विजा लोभमोहिताः । कुकर्माण्युपजीवन्ति ते वै निरयगामिनः ॥ ४४४ ॥
अर्जुन–उ० शीतर्भीताश्च ये विप्राः क्षत्रिया रणभीरवः । तेषां पापेन लिप्येऽहं यन्न हन्यां जयद्रथम् ॥ ४४५ ॥
वत्सदेशे च ये विप्रा ये विप्रा मरुमण्डले । तेषां पापेन लिप्येऽहं यन्न हन्यां जयद्रथम् ॥ ४४६ ॥
श्वानकुर्कुटमार्जारान्ये पुष्यन्ति दिने दिने । तेषां पापेन लिप्येऽहं यन्न हन्यां जयद्रथम् ॥ ४४७ ॥
पिता०— याजनं योनिसंबन्धं स्वाध्यायं सह भोजनम् । कृत्वा सद्यः पतत्येव पतितेन न संशयः ॥ ४४८ ॥



For Private and Personal Use Only

आसनाच्छयनाद्यानात्संभाषणात्सह भोजनात् । संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि ॥ ४४९ ॥
गोविक्रयास्तु ये विप्रा ज्ञेयास्ते मातृविक्रयाः । तेन देवाश्च वेदाश्च विक्रीता नात्र संशयः ॥ ४५० ॥
विक्रीय कन्यकां गां च कृच्छ्रसान्तपनं चरेत् । नारीणां विक्रयं कृत्वा चरेच्चान्द्रायणव्रतम् ॥ ४५१ ॥
स्कन्दपु०— गावः पवित्रमतुलं गावो मङ्गलमुत्तमम् । यासां खुरे स्थितो रेणुर्गङ्गाजलसमो भवेत् ॥ ४५२ ॥
शृङ्गाग्रे सर्वतीर्थानि खुराग्रे सर्वपर्वताः । शृङ्गयोरन्तरे यस्याः साक्षाद्गौरी महेश्वरी ॥ ४५३ ॥
गवां स्तुत्वा नमस्कृत्य कृत्वा चैव प्रदक्षिणाम् । प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ ४५४ ॥
मनु०—— यथा काष्टमयो हस्ती यथा चर्ममयो मृगः । यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ॥ ४५५ ॥
न तेन वृद्धो भवति येनास्य पलितं शिरः । यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥ ४५६ ॥
स्कन्द०— ब्राह्मणाऽतिक्रमो नास्ति विप्रे वेदविवर्जिते । ज्वलन्तं वह्निमुत्सृज्य नहि भस्मनि हूयते ॥ ४५७ ॥
आदित्य पु०—ज्ञानवृद्धस्तपोवृद्धो वयोवृद्ध इति त्रयः । पूर्वः पूर्वोऽभिवाद्यः स्यात्पूर्वाभावेऽपरे परः ॥ ४५८ ॥
नाधीतविद्यो विप्रो य आचारेषु प्रवर्तते । नाचारफलमाप्नोति यथा शूद्रस्तथैव सः ॥ ४५९ ॥
अनधीतस्य विप्रस्य पुत्रो वाध्ययनान्वितः । शूद्रपुत्रः स विज्ञेयो न वेदफलमश्नुते ॥ ४६० ॥
गीता०— पापामयौषधं कृत्वा शास्त्रं पुण्यनिबन्धनम् । चक्षुः सर्वत्रगं शास्त्रं शास्त्रं सर्वार्थसाधनम् ॥ ४६१ ॥
यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते जनः । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ ४६२ ॥
नन्दि पु०— यावदक्षरसंख्यानं विद्यते शास्त्रसञ्चये । तावद्वर्षसहस्राणि स्वर्गे विद्याप्रदो भवेत् ॥ ४६३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावत्यः पङ्क्तयस्तत्र पुस्तकेऽक्षरसंश्रिताः । तावतो नरकात्कल्पानुद्धृत्य नयते दिवि ॥ ४६४ ॥

देवीपु०— स गुरुः स पिता माता स च चिन्तामणिः स्मृतः । यः शास्त्रोपायमाख्याय नरकेभ्यः समुद्धरेत् ॥४६५॥

कस्तेन सदृशो लोके बान्धवो विद्यते परः । यस्य वाग्रश्मिवृन्देन हृदयान्नश्यते तमः ॥ ४६६ ॥

विष्णुपु०— एकं भद्रासनादीनां समास्थाय गुणैर्युतः । यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः ॥ ४६७ ॥

इति०— आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवः । दानं प्रसादो माधुर्यं सन्तोषश्च यमा दश ॥ ४६८ ॥

शौचमित्यातपः सत्यं स्वाध्यायोपस्थनिग्रहः । व्रतोपवासमौनं च स्नानं च नियमा दश ॥ ४६९ ॥

मनु०— धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । ह्रीविद्यासत्यमक्रोधो दशकं धर्मलक्षणम् ॥ ४७० ॥

के के नु ब्राह्मणा प्रोक्ताः किं वा ब्राह्मणलक्षणम् । एतदिच्छाम्यहं ज्ञातुं तन्मे कथय सुव्रत ! ४७१ ॥

पञ्चलक्षणसंपूर्ण इदृशो यो भवेद्द्विजः । तमेव ब्राह्मणं मन्ये शेषाः शूद्रा युधिष्ठिर ! ॥ ४७२ ॥

नवनीतं यथा दध्नश्चन्दनं मलयाद्रितः । औषधिभ्योऽमृतं यद्वद्वेदेष्वारण्यकं तथा ॥ ४७३ ॥

तत्र ऋषभ एव भगवान् ब्रह्मा, तेन भगवता ब्रह्मणा स्वयमेव चीर्णानि ब्रह्माणि, तपसा च प्राप्तं परमपदमिति ।

ब्रह्मण्याह० यदा न कुरुते पापं सर्वभूतेषु दारुणम् । कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ ४७४ ॥

यदा सर्वानृतं त्यक्तं मृषा भाषा विवर्जिता । अनवद्यं च भाषेत ब्रह्म सम्पद्यते तदा ॥ ४७५ ॥

परद्रव्यं यदा दृष्ट्वा आकुले ह्यथवा रहः । धर्मकामो न गृह्णाति ब्रह्म सम्पद्यते तदा ॥ ४७६ ॥

देवमानुषतिर्यक्षु मैथुनं वर्जयेद्यदा । कामरागविरक्तश्च ब्रह्म सम्पद्यते तदा ॥ ४७७ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदा सर्वं परित्यज्य निःसङ्गो निष्परिग्रहः । निश्चिन्तश्च चरेद् ब्रह्म ब्रह्म सम्पद्यते तदा ।। ४७८ ।।

ब्रह्माण्ड पु०— इह हि इक्ष्वाकुकुलवंशोद्भवेन नाभिसुतेन मरुदेव्या नन्दनेन महादेवेन ऋषभेण दशप्रकारो धर्मः स्वयमेव चीर्णः केवलज्ञानलम्भाच्च प्रवर्त्तितस्त्रेतायामादाविति ।

भाग०— नाभेर्मरुदेवायामपत्यकामस्य यजतः ऋषिगणाभ्यर्थितो नारायण ऋषभपुत्ररूपेण समवततार, तस्य च भरतादि पुत्रशतं यज्ज्ञे इति ।

शिवपु०— कैलासे विमले रम्ये वृषभोऽयं जिनेश्वरः । चकार स्वावतारं यः सर्वज्ञः सर्वगः शिवः ॥ ४७९ ॥

नगरपु०— सर्वज्ञः सर्वदर्शी च सर्वदेवनमस्कृतः । छत्रत्रयीभिः संपूज्यां युक्तां मूर्त्तिमसौ वहन् ॥ ४८० ॥

आदित्यप्रमुखाः सर्वे बद्धाञ्जलय ईदृशम् । ध्यायन्ति भावतो नित्यं यदंह्रियुगनीरुजम् ॥ ४८१ ॥

परमात्मानमात्मानं लसत्केवलनिर्मलम् । निरञ्जनं निराकारं वृषभं तु महाऋषिम् ॥ ४८२ ॥

अष्टषष्टिषु तीर्थेषु यत्पुण्यं किल यात्रया । आदिनाथस्य देवस्य दर्शनेनापि तद्भवेत् ॥ ४८३ ॥

विष्णुपु०— हिमाङ्कं यस्य वै वर्षं नाभेरासीन्महात्मनः । तस्यर्षभोऽभवत्पुत्रो मरुदेव्यां महाद्युतिः ॥ ४८४ ॥

ऋषभाद्भरतो जज्ञे ज्येष्ठः पुत्रः शतस्य सः । कृत्वा राज्यं स्वधर्मेण तथेष्ट्वा विविधान्मखान् ॥ ४८५ ॥

अभिषिच्य सुतं वीरं भरतं पृथिवीपतिम् । तपसे स महाभागः पुलहस्त्याश्रमं ययौ ॥ ४८६ ॥

वानप्रस्थविधानेन तत्रापि कृतनिश्चयः । तपस्तेपे यथान्यायमियाज च महीपतिः ॥ ४८७ ॥

ततश्च भारतं वर्षं मृतलोकेषु गीयते । भरताय यतः पित्रा दत्तं प्रतिष्ठता वने ॥ ४८८ ॥

For Private and Personal Use Only

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं यद्भारतं नाम भारती यत्र सन्ततिः ॥ ४८९ ॥
नवयोजनसहस्रो विस्तारोऽस्य महामुने ! । कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् ॥ ४९० ॥
अतः सम्प्राप्यते स्वर्गो मुक्तिमस्मात्प्रयान्ति च । तिर्यक्त्वं नरकं वापि यान्त्यतः पुरुषा मुने ! ॥ ४९१ ॥
तपस्तप्यन्ति यतयो जुह्वते चात्र यज्विनः । दानानि चात्र दीयन्ते परलोकार्थमादरात् ॥ ४९२ ॥
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! । कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥ ४९३ ॥

गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ॥ ४९४ ॥
जानीम नैतत्कवयं विलीने स्वर्गप्रदे कर्मणि देहबन्धम् ।
प्रापस्याम धन्याः खलु ते मनुष्या ये भारते नेन्द्रियकर्महीना (?) ॥ ४९५ ॥

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ! । यतो हि कर्मभूरेषा ह्यतोऽन्या भोगभूमयः ॥ ४९६ ॥
चत्वारि भारते वर्षे युगान्यत्र महामुने ! । कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित् ॥ ४९७ ॥
तुर्यारण्य०— ऋषयस्ते महात्मानः प्रत्यक्षागमबुद्धयः । कर्मभूमिमिमां प्राप्य पुनर्यान्ति सुरालयम् ॥ ४९८ ॥

## अथ तपसि.

विष्णुपु० ऋषयः—चतुःपञ्चाब्दसंभूतो बालस्त्वं नृपनन्दन ! । निर्वेदकारणं किञ्चित्तवाद्यापि न दृश्यते ॥ ४९९ ॥
ध्रुवः— नाहमर्थमभीप्सामि न राज्यं द्विजसत्तमाः ! । तत्स्थानमेकमिच्छामि भुक्तं नान्येन यत्पुरा ॥ ५०० ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जन्मन्यत्र महद्दुःखं म्रियमाणस्य चाति तत् । यातनासु यमस्योग्रं गर्भसंक्रमणेषु च ॥ ५०१ ॥

मा जानीत वयं बाला देही देहेषु शाश्वतः । जरायौवनजन्माद्या धर्मा देहस्य नात्मनः ॥ ५०२ ॥

बालोऽहं तावदिच्छातो यतिष्ये श्रेयसे युवा । युवाहं वार्द्धके प्राप्ते करिष्याम्यात्मनो हितम् ॥ ५०३ ॥

वृद्धोऽहं मम कार्याणि समस्तानि न गोचरे । किं करिष्यामि मन्दात्मा न समर्थेन यत्कृतम् ॥ ५०४ ॥

एवं दुराशयाक्षिप्तमानसः पुरुषः सदा । श्रेयसोऽभिमुखं याति न कदाचित्पिपासितः ॥ ५०५ ॥

बाल्ये क्रीडनकासक्ता यौवने विषयोन्मुखाः । अज्ञानयन्त्यशक्तया च वार्द्धकं समुपस्थितम् ॥ ५०६ ॥

तस्माद्बाल्ये विवेकात्मा यतेत श्रेयसे सदा । बालयौवनवृद्धाद्यैर्देहभावैरसङ्गतः ॥ ५०७ ॥

इतिहा०— यौवने सति राजेन्द्र ! रूपे द्रव्ये तथैव च । यो वै जितेन्द्रियो धीरः सोऽक्षयं स्वर्गमश्नुते ॥ ५०८ ॥

बालश्चापि चरेद्धर्ममनित्यं खलु जीवितम् । फलानामिव पक्वानां शाखापतनतो भयम् ॥ ५०९ ॥

को जानाति कदा कस्य मृत्युकालो भविष्यति । युवैव धर्मशीलः स्याद्यतोऽनित्यं हि जीवितम् ॥ ५१० ॥

मातृपितृसहस्राणि पुत्रदारशतानि च । अनेकशोऽप्यतीतानि कस्य त्वं कस्य तानि च ॥ ५११ ॥

विष्णुपु०—भगीरथाद्याः सगरः ककुत्स्थो दशाननो राघवलक्ष्मणौ च । युधिष्ठिराद्याश्च बभूवुरेते सत्यं न मिथ्या क्व नु ते न विद्मः ॥

एतद्विदित्वा न नरेण कार्यं ममत्वमात्मन्यपि पण्डितेन ।
तिष्ठन्तु तावत्तनयात्मजाद्याः क्षेत्रादयो ये तु शरीरतोऽन्ये ॥ ५१३ ॥

स्कन्द०—देहो यथाऽस्मदादीनां स्वकालेन विलीयते । ब्रह्मादिमरुकान्तानां स्वकालाल्लियते तथा ॥ ५१४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतिहा०—न स कश्चिदुपायोऽस्ति देवो वा मानुषोऽपि वा । येन मृत्युवशं प्राप्तो जन्तुः पुनरिहाव्रजेत् ॥ ५१५ ॥
बालांश्च यौवनस्थांश्च वृद्धान्गर्भगतानपि । सर्वानाविशते मृत्युरेवंभूतमिदं जगत् ॥ ५१६ ॥
नायमत्यन्तसंवासः कस्यचित्केनचित्सह । अपि स्वेम शरीरेण किमुतान्येन केनचित् ॥ ५१७ ॥
पण्डिते चैव मूर्खे च बलवत्यथ दुर्बले । ईश्वरे च दरिद्रे च मृत्योः सर्वत्र तुल्यता ॥ ५१८ ॥
यथाहि पथिकः कश्चिच्छायामाश्रित्य विश्रमेत् । विश्रम्य च पुनर्गच्छेत्तद्वद्भूतसमागमः ॥ ५१९ ॥
समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम् । कायः संनिहितापायः सम्पदः पदमापदाम् ॥ ५२० ॥
भाग०—गृहेषु कूटधर्मेषु दुःखतन्त्रेषु तन्द्रितः । कुर्वन्दुःखप्रतीकारं सुखं तन्मन्यते गृही ॥ ५२१ ॥
पुत्रदारधनार्थधीर्न परं विन्दते मूढः । - - - - - - - - भ्राम्यन्संस्कारवर्त्मसु ॥ ५२२ ॥
केवलेन ह्यधर्मेण कुटुम्बभरणोत्सुकः । याति जीवोऽन्धतामिश्रं चरमं तमसः पदम् ॥ ५२३ ॥
मनु०— पञ्चसूना गृहस्थस्य चुली पेषण्युपस्करः । कुण्डनी चैव कुम्भश्च बध्यते यास्तु वाहयन् ॥ ५२४ ॥
मिता— गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव वाऽपत्यां तदाऽरण्यं समाश्रयेत् ॥ ५२५ ॥
चान्द्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा । पक्षे गते वाप्यश्नीयान्मासे वाऽहनि वा गते ॥ ५२६ ॥
भाग०— त्यक्त्वा सङ्गमपारपर्वतगुहागर्भे रहस्स्थीयतां रे रे चित्त ! कुटुम्बपालनविधौ को वाधिकारस्तव ।
यस्यैताः पुरतः प्रसारितदृशः प्राणप्रियाः पश्यतो नीयन्ते यमकिङ्करैः करतलादाच्छिद्य पुत्रादयः ॥ ५२७ ॥
विष्णुपु०—यस्तु संत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते । परिव्राट् चापि मैत्रेय ! स नग्नः पापकृन्नरः ॥ ५२८ ॥



For Private and Personal Use Only

नित्यानां कर्मणां विप्र ! यस्य हानिरहर्निशम् । अकुर्वन्विहितं कर्म शक्तः पतति तद्दिने ॥ ५२९ ॥
संवत्सरं क्रियाहानिर्यस्य पुंसः प्रजायते । तस्यावलोकनात्सूर्यो निरीक्ष्यः साधुभिः सदा ॥ ५३० ॥
स्पृष्टे स्नानं सचेलस्य शुद्धिहेतुर्महामुने ! । पुंसो भवति तस्योक्ता न शुद्धिः पापकर्मणः ॥ ५३१ ॥
मिता०— स्वप्याद्भूमौ रात्रौ दिवसं प्रपदैर्नयेत् । स्थानासनविहारैर्वा योगाभ्यासेन वा पुनः ॥ ५३२ ॥
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः । आर्द्रवासास्तु हेमन्ते शक्त्या वा तपसश्चरेत् ॥ ५३३ ॥
यः कण्टकैर्वितुदति चन्दनैर्यश्च लिम्पति । अक्रुष्टोऽपरितुष्टश्च समस्तस्यव - - - ॥ ५३४ ॥
ग्रामादाहृत्य वा ग्रासानष्टौ भुञ्जते वाग्यतः । अशक्तौ वा मुनेर्भक्तं वानप्रस्थस्य षोडश ॥ ५३५ ॥
कुटुम्बपुत्रदारं च वेदाङ्गानि च सर्वशः । केशान्यज्ञोपवीतं च त्यक्त्वा शूद्रं चरेन्मुनिः ॥ ५३६ ॥
एको भिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतम् । त्रयो ग्रामः समाख्यात उर्ध्वं तु नगरायते ॥ ५३७ ॥
राजवार्त्तादि तेषां च भिक्षावार्ता परस्परम् । अतिपैशुन्यमात्सर्ये सन्निकर्षान्न संशयः ॥ ५३८ ॥
एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् । वर्षाभ्योऽन्यत्र वर्षासु मासांश्चतुरो वसेत् ॥ ५३९ ॥
अप्रमत्तश्चरेद्भैक्षं सायाह्नेऽनभिलक्षितः । रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ॥ ५४० ॥
सप्तागारां चरेद्भिक्षां प्रसह्येत न विस्तरे । भैक्षप्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥ ५४१ ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया । नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ ५४२ ॥
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः । आकीर्णं भिक्षुकैरन्यैरगारमुपसंव्रजेत् ॥ ५४३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा । अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीयाद्वाग्यतः ॥ ५४४ ॥
यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च । सलिलैः शुद्धिरेतेषां गोवालैश्चावघर्षणम् ॥ ५४५ ॥
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च । तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥ ५४६ ॥
संनिरुध्येन्द्रियग्रामं रागद्वेषौ प्रहाय च । भयं हत्वा च भूतानाममृतीभवति द्विजः ॥ ५४७ ॥
भूषितोपि चरेद्धर्मं यत्र तत्राश्रमे वसन् । समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ॥ ५४८ ॥
विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥ ५४९ ॥
प्रायश्चितमकुर्वाणाः पापेषु निरता नराः । अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान् ॥ ५५० ॥
प्रायश्चित्तं स्त्रियामर्द्धं वृद्धानां रोगिणां तथा । पादो बालेषु दातव्यं सर्वपापेष्वयं विधिः ॥ ५५१ ॥
विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतम् । वैश्येऽर्द्धं पाद एकस्तु शूद्रजातिषु शस्यते ॥ ५५२ ॥
देशं कालं वयः शक्ति पापं चापेक्ष्य यत्नतः । प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः ॥ ५५३ ॥
ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च । प्रायश्चित्तं चरेद्भ्राता पिता चान्यसुहृज्जनः ॥ ५५४ ॥
प्रायश्चित्तं यदाम्नातं ब्राह्मणस्य महर्षिभिः । पादोनं क्षत्रियस्यार्द्धं वैश्ये पादं च शूद्रके ॥ ५५५ ॥
प्रायश्चित्तेऽध्यवसिते कर्त्ता यदि विपद्यते । पूतस्तदहन्येवासाविह लोके परत्र च ॥ ५५६ ॥
ब्राह्मणः क्षत्रियं हत्वा षड्वर्षाणि व्रतं चरेत् । वैश्यं हत्वा चरेदेवं व्रतं त्रैवार्षिकं द्विजः ॥ ५५७ ॥
शूद्रं हत्वा चरेद्वर्षं वृषभैकादशाश्वगाः । मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च ॥ ५५८ ॥



For Private and Personal Use Only

मिता०— गोमुत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । जग्ध्वाऽपरेऽह्न्युपवासः कृच्छ्रंसान्तपनं च तत् ॥ ५५९ ॥
गोमुत्रमाषकानष्टौ गोमयस्य च षोडश । क्षीरस्य द्वादश प्रोक्ता दध्नश्च दश कीर्तिताः ॥ ५६० ॥
गोमुत्रवद्घृतस्याष्ट तदर्द्ध तु कुशोदकम् । प्रणवेन समालोड्य पिबेत्तत्प्रणवेन तु ॥ ५६१ ॥
पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः । सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनः स्मृतः ॥ ५६२ ॥
षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् । त्र्यहं चोपवसेदन्त्यं महासान्तपनं विदुः ॥ ५६३ ॥
तिथिवृद्ध्याचरेत्पिण्डान्शुक्ले शशिसंख्यसंमितान् । एकैकं ह्रासयेत्कृष्णे पिण्डं चान्द्रायणं चरेत् ॥ ५६४ ॥
ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च । प्रायश्चित्तं चरेद्भ्राता पिता चान्यसुहृज्जनः ॥ ५६५ ॥
मनु०— ख्यापनेनानुतापेन तपसाऽध्ययनेन च । पापकृन्मुच्यते पापात्तथा दानेन चापदि ॥ ५६६ ॥
यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति । तथा तथा शरीरं तत्तेनाधर्मेण मुच्यते ॥ ५६७ ॥
आदित्य पु०—प्रायश्चित्तस्य सर्वस्य पश्चात्तापो हि कारणम् । न तेन रहितं पापं गच्छतीति सुनिश्चितम् ॥ ५६८ ॥
प्रायश्चित्तं न तस्यास्ति दत्तैर्ग्रामशतैरपि । शिवद्रव्यापहरणं गुरोरप्यणुमात्रकम् ॥ ५६९ ॥
पद्मपु०— ज्ञाताज्ञातेषु पापेषु क्षुद्रेषु च महत्सु च । षट्सु षट्सु च मासेषु प्रायश्चित्तं तु यश्चरेत् ॥ ५७० ॥
निष्कल्मषो नरो वैश्य ! स कृतान्तं न पश्यति । प्रायश्चित्तमकृत्वेह नरो भवति नारकी ॥ ५७१ ॥
द्रव्यमात्रं फलं तोयं शिवस्वं न स्पृशेत्क्वचित् । निर्माल्यं नैव संलक्षेत्कूपे सर्वं च तत्क्षिपेत् ॥५७२॥
मिता०— औषधं स्नेहमाहारं ददद्गोब्राह्मणे द्विजः । दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते ॥५७३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बन्धने गोचिकित्सार्थे गूढगर्भविमोचने । यत्ने कृते विपत्तिः स्यात्प्रायश्चित्तं न विद्यते ॥ ५७४ ॥
आक्रुष्टस्ताडितो वाऽपि धनैर्वापि वियोजितः । यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ॥५७५॥
अकारणं तु यः कश्चिद्द्विजः प्राणान्परित्यजेत् । तस्यैव तत्र दोषः स्यान्नतु यं परिकीर्तयेत् ॥ ५७६ ॥
आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः । जानन्तो न प्रयच्छन्ति ते यान्ति समतां तु तैः ॥५७७॥
अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः । प्रायश्चित्ती भवेत्पूतः किल्बिषं पर्षदं व्रजेत् ॥५७८॥
पद्मपु०— ज्ञाताज्ञातेषु पापेषु क्षुद्रेषु च महत्सु च । षट्सु षट्सु च मासेषु प्रायश्चित्तं तु यश्चरेत् ॥ ५७९ ॥
निष्कल्मषो नरो वैश्य ! स कृतान्तं न पश्यति । प्रायश्चित्तमकृत्वेह नरो भवति नारकी ॥ ५८० ॥
विष्णुपु०— ततश्च नरका विप्र ! भुवोऽधः सलिलस्य च । पापिनो येषु पात्यन्ते तान्शृणु च महामुने ! ॥५८१ ॥
रौरवः सूकरो रोधस्तालो विशसनस्तथा । महाज्वालस्तप्तकुम्भो लवणोऽथ विमोहितः ॥५८२॥
रुधिरान्धो वैतरणी कृमीशः कृमिभोजनः । असिपत्रवनं कृष्णो लालाभक्ष्यश्च दारुणः ॥५८३॥
तथा पूयवहः पाव वह्निज्वालो ह्यधःशिराः । संदंशः कृष्णसूत्रश्च तमश्चावीचिरेव च ॥ ५८४ ॥
श्वभोजनोऽथाप्रतिष्ठोऽवीचिश्चैव तथाऽपरः । इत्येवमादयश्चान्ये नरका भृशदारुणाः ॥ ५८५ ॥
यमस्य विषये घोराः शस्त्राग्निभयदायिनः । पतन्ति येषु पुरुषाः पापकर्मरताश्च ये ॥ ५८६ ॥
कूटसाक्षी तथाऽसम्यक् पक्षपातेन यो वदेत् । यश्चान्यदनृतं वक्ति स नरो याति रौरवम् ॥५८७॥
भ्रूणहा पुरहन्ता च गोघ्नश्च मुनिसत्तम ! । यान्ति ते नरकं रोधं यश्चोच्छ्वासनिरोधकः ॥५८८॥



For Private and Personal Use Only

सुरापो ब्रह्महा हर्ता सुवर्णस्य च सूकरे । प्रयाति नरके यश्च तैः संसर्गमुपैति वै ॥ ५८९ ॥
राजन्यवैश्यहा ताले तथैव गुरुतल्पगः । तप्तकुम्भे स्वसृगामी हन्ति राजभटांश्च यः ॥ ५९० ॥
साध्वीविक्रयकृद्बन्धपालः केशरिविक्रयी । तप्तलोहे तु पच्यन्ते यश्च भक्तं परित्यजेत् ॥ ५९१ ॥
स्नुषासुताभिगामी च महाज्वाले निपात्यते । अवमन्ता गुरूणां यो यश्चाक्रोष्टा नराधमः ॥५९२॥
स याति कृमिभोक्ष्ये वै कृमीशे च दुरिष्टकृत् । मनुष्यपितृदेवान्यः पर्यश्नाति नराधमः ॥ ५९३ ॥
लालाभक्ष्ये स यात्युग्रे शरकर्ता च रोधके । करोति कर्णिनो यस्तु यश्च खड्गादिकृन्नरः ॥ ५९४ ॥
प्रयान्त्येते विशसने नरके भृशदारुणे । असत्प्रतिगृहीता तु नरके यात्यधोमुखः ॥ ५९५ ॥
अयाज्ययाजकस्तत्र तथा नक्षत्रसूचकः । वेगात्पूयवहे चैको मिष्टान्नभुग्नरः किलः ॥ ५९६ ॥
लाक्षामांसरसानां च तिलानां लवणस्य च । विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ! ॥ ५९७ ॥
मार्जारकुक्कुटच्छागश्ववराहविहङ्गमान् । पोषयन्नरकं याति तमेव द्विजसत्तम ! ॥ ५९८ ॥
रङ्गोपजीवी कैवर्तः कुण्डाशी गरदस्तथा । सूची माहिषिकश्चैव पर्वगामी च यो द्विजः ॥ ५९९ ॥
अगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः । रुधिरान्धे पतन्त्येते मांसं विक्रीणते तु ये ॥ ६०० ॥
मधुहा ग्रामहन्ता च याति वैतरणीं नरः । धनयौवनमत्ताश्च मर्यादाभेदिनो हि ये ॥ ६०१ ॥
ते कृष्णे यान्त्यशौचाश्च कुहकाजीविनश्च ये । असिपत्रवनं याति वनच्छेदी तथैव यः ॥ ६०२ ॥
औरभ्रिको मृगव्याधो वह्निज्वाले निपात्यते । यान्त्येते द्विज ! तत्रैव ये चापाकेषु वह्निदाः ॥ ६०३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्रतानां लोपको यश्च स्वाश्रमाद्विच्युतश्च यः । सन्दंशयातनामध्ये पततस्तावुभावपि ॥ ६०४ ॥
दिवा स्वप्ने तु स्कन्दन्ते ये नरा ब्रह्मचारिणः । पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने ॥ ६०५ ॥
एते चान्ये च नरकाः शतशोऽथ सहस्रशः । येषु दुष्कृतकर्माणः पच्यन्ते यातनागताः ॥ ६०६ ॥
तथैव पापान्येतानि तथाऽन्यानि सहस्रशः । भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः ॥ ६०७ ॥
वर्णाश्रमविरुद्धं च कर्म्म कुर्वन्ति ये नरा । कर्मणा मनसा वाचा निरयेषु पतन्ति ते ॥ ६०८ ॥
क्रकचैः पाट्यमानानां मूषायां चापि धम्यताम् । कुठारैः कृत्यमानानां भूमौ चापि निखन्यताम् ॥ ६०९ ॥
शूलेष्वारोप्यमाणानां व्याघ्रवक्त्रे प्रवेश्यताम् । गृध्रैः संभक्ष्यमाणानां द्वीपिभिश्चोपभुज्यताम् ॥ ६१० ॥
क्वाथ्यतां तैलमध्ये च क्लिश्यतां क्षारकर्दमे । उच्चान्निपत्यमानानां क्षिप्यतां क्षेपयन्त्रकैः ॥ ६११ ॥
नरके यानि दुःखानि पापहेतूद्भवानि वै । प्राप्यन्ते नारकैर्विप्र ! तेषां संख्या न विद्यते ॥ ६१२ ॥
न केवलं द्विजश्रेष्ठ ! नरके दुःखपद्धतिः । स्वर्गेऽपि पापभीतस्य क्षयिष्णोर्नास्ति निर्वृत्तिः ॥ ६१३ ॥
इतिहा०—परुषाः पिशुनाश्चैव मानिनोऽनृतवादिनः । असम्बद्धप्रलापाश्च नरा निरयगामिनः ॥ ६१४ ॥
ये परस्वापहर्तारः परस्वानामसूयकाः । परश्रियाऽवतप्यन्ते ते वै निरयगामिनः ॥ ६१५ ॥
कूपानां च तडागानां प्राणिनां च परन्तपाः । सरसां चैव भेत्तारो नरा निरयगामिनः ॥ ६१६ ॥
काष्ठैर्वा शङ्कुभिर्वापि सूत्रैरश्मिभिरेव वा । ये मार्गमुपरुन्धन्ति ते वै निरयगामिनः ॥ ६१७ ॥ 
कन्याविक्रयिणश्चाथ रसविक्रयिणस्तथा । विषविक्रयिणश्चैव नरा निरयगामिनः ॥ ६१८ ॥

For Private and Personal Use Only

मद्यमांसरता नित्यं गीतवाद्यरतास्तथा । द्यूतसङ्गरताश्चैव नरा निरयगामिनः ॥ ६१९ ॥
ये शरीरमलानग्नौ प्रक्षिपन्ति जले तथा । उद्याने पथि गोष्ठे वा ते वै निरयगामिनः ॥ ६२० ॥
शस्त्राणां चैव कर्तारः शिल्पानां धनुषां तथा । विक्रेतारश्च राजेन्द्र ! ते वै निरयगामिनः ॥ ६२१ ॥
अनाथं कृपणं हीनं रोगार्त्तं वृद्धमेव च । नानुकम्पन्ति ये मूढास्ते वै निरयगामिनः ॥ ६२२ ॥
नियमान्समुपादाय ये पश्चादजितेन्द्रियाः । विलोपयन्ति तान्भूयस्ते वै निरयगामिनः ॥ ६२३ ॥
मिता०— ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः । एते महापातकिनो यश्च तैः सह संवसेत् ॥ ६२४ ॥
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः । छित्त्वा लिङ्गं वधस्तस्य सकामायाः स्त्रिया अपि ॥ ६२५ ॥
सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च । सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम् ॥ ६२६ ॥
नीचाभिगमनं गर्भपातनं भर्तृहिंसनम् । विशेषपतनीयानि स्त्रीणामेतानि निश्चितम् ॥ ६२७ ॥
पुरुषोऽनृतवादी च पिशुनः परुषस्तथा । असम्बद्धप्रलापी च मृगपक्षिषु जायते ॥ ६२८ ॥
अदत्तादाननिरतः परदारोपसेवकः । हिंसकश्चाविधानेन स्थावरेष्वपि जायते ॥ ६२९ ॥
असत्कार्यरतो धीर आरम्भी विषयी च यः । स राजसो मनुष्येषु मृतो जन्माधिगच्छति ॥ ६३० ॥
निद्रालुः क्रूरकृत्यश्च नास्तिको याचकस्तथा । प्रमादवान्भिन्नवृत्तो भवेत्तिर्यक्षु तामसः ॥ ६३१ ॥

## तपः प्रभावे

मनु०— महापातकिनश्चैव शेषाश्चाकार्यकारिणः । तपसैव सुतप्तेन मुच्यन्ते किल्बिषात्ततः ॥ ६३२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कीटाश्चाहिपतङ्गाश्च पशवश्च वयांसि च । स्थावराणि च भूतानि दिवं यान्ति तपोबलात् ॥ ६३३ ॥
किञ्चिदेनः कुर्वन्ति मनोवाक्कर्मभिर्जनाः । तत्सर्वं निर्दहन्त्याशु तपसैव तपोधनाः ॥ ६३४ ॥

## अथ कर्मणि.

तुर्यारण्य०— यः करोत्यशुभं कर्म शुभं वा द्विजसत्तम ! । अवश्यं फलमाप्नोति पुरुषो नात्र संशयः ॥ ६३५ ॥
बहवः संप्रदृश्यन्ते तुल्यनक्षत्रमङ्गलाः । महच्च फलवैषम्यं दृश्यते कर्मसन्धिषु ॥ ६३६ ॥
तिर्यग्योनिसहस्राणि गत्वा नरकमेव च । जीवाः संपरिवर्त्तन्ते कर्मबन्धनिबन्धनाः ॥ ६३७ ॥
जन्तुस्तु कर्मभिः स्वैः स्वैः स्वकृतैः प्रेत्य दुःखितः । तद्दुःखप्रतिघातार्थमपुण्यां योनिमश्नुते ॥ ६३८ ॥
ततः कर्म समादत्ते पुनरन्यन्नवं बहु । पच्यते तु पुनस्तेन भुक्त्वाऽपथ्यमिवातुरः ॥ ६३९ ॥
पद्मपु०— सत्यं वदामि ते प्रीत्या नरैः कर्म शुभाशुभम् । स्वकृतं भुज्यते वैश्य ! काले काले पुनः पुनः ॥ ६४० ॥
एक करोति कर्माणि एकस्तत्फलमश्नुते । अन्यो न लिप्यते वैश्य ! कर्मणाऽन्यस्य कुत्रचित् ॥ ६४१ ॥
इतिहा०— यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् । तथा शुभाशुभं कर्म कर्त्तारमधिगच्छति ॥ ६४२ ॥
ग्रहा रोगा विषं स्तेना राजानः शकुनास्तथा । पीडयन्ति नरं पश्चात् पीडितं पूर्वकर्मणा ॥ ६४३ ॥

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथो हि वने विसर्जितः कृतप्रयत्नोऽपि गृहे न जीवति ॥ ६४४ ॥

नोद्यमानोऽपि पापेषु शुद्धात्मा न प्रवर्तते । वार्यमाणोऽपि पापेभ्यः पापात्मा पापमिच्छति ॥ ६४५ ॥ 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जन्मान्तरसहस्रेषु या बुद्धिर्भाविता पुरा । तमेव भजते जन्तुरुपदेशो निरर्थकः ।। ६४६ ।।
किं करोति नरः प्राज्ञः प्रेर्यमाणः स्वकर्मभिः । प्रायेण हि मनुष्याणां बुद्धिः कर्मानुसारिणी ।। ६४७ ।।
मिता०— प्रतिजन्म यदभ्यस्तं दानमध्ययनं तपः । तेनैवाभ्यासयोगेन तदेवाभ्यस्यते पुनः ।। ६४८ ।।
अहङ्कारेण मनसा गत्या कर्मफलेन च । शरीरेण च नात्माऽयं मुक्तपूर्वः कदाचन ।। ६४९ ।।
मनु०— यादृशेन तु भावेन यद्यत्कर्म निषेवते । तादृशेन शरीरेण तत्फलमथाश्नुते ।। ६५० ।।

## अथ भावे.

विष्णुपु०— मन एव मनुष्याणां कारणं बन्धमोक्षयोः । बन्धस्य विषयासङ्गि मुक्तेर्निर्विषयं मनः ।। ६५१ ।।
विषयेभ्यः समाहृत्य विज्ञानात्मा महामुनिः । चिन्तयेन्मुक्तये येन परं ब्रह्म परेश्वरम् ।। ६५२ ।।
आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः । तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ।। ६५३ ।।
एवमन्यच्च वै शिष्य ! युक्तधर्मोपलक्षणम् । यस्य योगः स वै योगी मुमुक्षुरभिधीयते ।। ६५४ ।।
मिता०— दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः । तथेन्द्रियाणां दह्यन्ते दोषा मानसनिग्रहात् ।। ६५५ ।।
इति०— मनसश्चेन्द्रियाणां च ये नित्यं संयमे रताः । त्यक्तलोभभयक्रोधास्ते नरा स्वर्गगामिनः ।। ६५६ ।।
दानमिज्या तपः शौचं तीर्थं वेदाः श्रुतं तथा । अशान्तमनसः पुंसः सर्वमेतदनर्थकम् ।। ६५७ ।।
मनु०— यस्य वाग्मनसे शुद्धे सम्यग्गुप्ते च सर्वदा । स वै च सर्वमाप्नोति वेदान्तोपगतं फलम् ।। ६५८ ।।
वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च । यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ।। ६५९ ।।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाग०— समाहितं यस्य मनःप्रशान्तं दानादिभिः किं वद तस्य कृत्यम् ।
असंयतं यस्य मनो विनश्येद्दानादिभिश्चेदपरं किमेभिः ॥ ६६० ॥
नाऽयं जनो मे सुखदुःखहेतुर्नदेवतात्मग्रहकर्मकालः । मनः परं कारणमामनन्ति संसारचक्रं परिवर्त्तयेद्यत् ॥६६१॥
चित्तं रागादिभिः क्लिष्टमलीकवचनैर्मुखम् । जीवहिंसादिभिः कायो गङ्गा तस्य पराङ्मुखी ॥ ६६२ ॥
चित्तं शमादिभिः शुद्धं वदनं सत्यभाषणैः । ब्रह्मचर्यादिभिः कायः शुद्धो गङ्गा विनाप्यसौ ॥ ६६३ ॥
परदारपरद्रव्यपरद्रोहपराङ्मुखः । गङ्गाऽप्याह कदाऽऽगत्य मामयं पावयिष्यति ॥ ६६४ ॥
कामरागमदोन्मत्ताः स्त्रीणां ये वशवर्त्तिनः । न ते जलेन शुद्ध्यन्ति स्नातास्तीर्थशतैरपि ॥ ६६५ ॥
स्नानं मददर्पकरं कामाङ्गं प्रथमं स्मृतम् । तस्मात्कामं परित्यज्य नैवं स्नान्ति दमे रताः ॥ ६६६ ॥
गङ्गातोयेन सर्वेण मृत्पिण्डैश्च नगोपमैः । अमृतैराचरञ्शौचं दुष्टभावो न शुध्यति ॥ ६६७ ॥
यावद्वर्षसहस्रं तु अहन्यहनि मज्जनम् । सागरेणापि कृत्स्नेन वधको नैव शुध्यति ॥ ६६८ ॥
स्कन्द०— मृदो भारसहस्रेण जलकुम्भशतेन च । न शुध्यन्ति दुराचाराः स्नातास्तीर्थशतैरपि ॥ ६६९ ॥
नोदकक्लिन्नगात्रोऽपि स्नात इत्यभिधीयते । स स्नातो यो दमस्नातः स बाह्याभ्यन्तरं शुचिः ॥ ६७० ॥
न मृत्तिका नैव जलं नाप्यग्निः कर्मशोधनम् । शोधयन्ति बुधाः कर्म ज्ञानध्यानतपोजलैः ॥ ६७१ ॥
मृत्तिकोदकसम्पर्काद्यदि शुध्यन्ति जन्तवः । कुलालः सकुटुम्बोऽपि तर्हि स्वर्गं गमिष्यति ॥ ६७२ ॥
चेच्छुध्यन्ति बहिःस्नानादन्तःपापमलीमसाः । तत्सेत्स्यन्ति ध्रुवं मत्स्यमकराद्याः पुरैव हि ॥ ६७३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आत्मानदी संयमतोयपूर्णा सत्यावहा शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरु पाण्डुपुत्र ! न वारिणा शुध्यति चान्तरात्मा ॥ ६७४ ॥

स्कन्दपु०— नक्तं दिनं निमज्जन्तः कैवर्त्ताः किमु पावनाः ? । शतशोऽपि तथा स्नाता न शुद्धा भावदूषिताः ॥ ६७५ ॥
न जलाप्लुतदेहस्य स्नानमित्यभिधीयते । स स्नातो यो दमस्नातः शुचिः शुद्धमनोमलः ॥ ६७६ ॥
यो लुब्धः पिशुनः क्रूरो दाम्भिको विषयात्मकः । सर्वतीर्थेष्वपि स्नातः पापो मलिन एव सः ॥ ६७७ ॥
न शरीरमलत्यागान्नरो भवति निर्मलः । मानसे तु मले त्यक्ते भवत्यन्तः स निर्मलः ॥ ६७८ ॥
जायन्ते च म्रियन्ते च जलेष्वेव जलौकसः । न च गच्छन्ति ते स्वर्गमविशुद्धमनोमलाः ॥ ६७९ ॥
विषयेष्वतिसंरागो मानसो मल उच्यते । तेष्वेव हि विरागोऽस्य नैर्मल्यं समुदाहृतम् ॥ ६८० ॥
चित्तमन्तर्गतं दुष्टं तीर्थस्नानान्न शुध्यति । शतशोऽथ जलैर्धौतं सुराभाण्डमिवाशुचि ॥ ६८१ ॥
दानमिज्या तपः शौचं तीर्थसेवा श्रुतं तथा । सर्वाण्येतान्यतीर्थानि यदि भावो न निर्मलः ॥ ६८२ ॥
ज्ञानपूते ध्यानजले रागरोषमलापहे । यः स्नाति मानसे तीर्थे स याति परमां गतिम् ॥ ६८३ ॥

पद्मपु०— अन्तःकरणशुद्धा ये तान्विभूतिः पवित्रयेत् । किं पावनाः प्रकीर्यन्ते रासभा भस्मधूसराः ॥ ६८४ ॥
स स्नातः सर्वतीर्थेषु स सर्वमलवर्जितः । तेन क्रतुशतैरिष्टं चेतो यस्येह निर्मलम् ॥ ६८५ ॥

स्कन्द०— श्रीपर्वतादितीर्थानि धारातीर्थं तथापरम् । मानसान्यपि तीर्थानि सत्यादीनि च वै प्रिये ! ॥ ६८६ ॥
सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदया तीर्थं तीर्थं मार्दवमेव च ॥ ६८७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते । ब्रह्मचर्यं परं तीर्थं तीर्थं च प्रियवादिता ॥ ६८८ ॥
परद्रोहधियो ये च परेर्ष्याकारिणस्तथा । परोपतापिनो ये वै तेषां काशी न सिद्धये ॥ ६८९ ॥
परापवादशीलेन परदाराभिलाषिणा । तेन काशी न संसेव्या क्व काशी निरयः क्व सः ? ॥ ६९० ॥
अर्थार्थिनस्तु ये विप्रा ये च कामार्थिनो नराः । अतिमुक्तं न संसेव्यं मोक्षक्षेत्रमिदं यतः ॥ ६९१ ॥
प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित् । अहङ्कारविमुक्तश्च स तीर्थफलमश्नुते ॥ ६९२ ॥
अकोपनोऽमलमतिः सत्यवादी दृढव्रतः । आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥ ६९३ ॥
अदम्भको निरारम्भो लब्धाहारो जितेन्द्रियः । विमुक्तः सर्वसङ्गैर्यः स तीर्थफलमश्नुते ॥ ६९४ ॥
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् । विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ ६९५ ॥
पद्मपु०— न तीर्थैर्न तपोभिश्च कृतघ्नस्य हि निष्कृतिः । सहते यातनां घोरां स नरो नरके चिरम् ॥ ६९६ ॥
न तीर्थे पातकं कुर्यात्त्यजेत्तीर्थोपजीविकाम् । तीर्थे परिग्रहस्त्याज्यस्त्याज्यो धर्मस्य विक्रयः ॥ ६९७ ॥
दुर्जरं पातकं तीर्थे दुर्जरश्च प्रतिग्रहः । तीर्थे तु दुर्जरं सर्वमेतत्कुन्नरकं व्रजेत् ॥ ६९८ ॥
विष्णुभक्तिचन्द्रोदये०—सप्तस्नानि प्रोक्तानि स्वयमेव स्वयंभुवा । द्रव्यभावविशुद्ध्यर्थमृषीणां ब्रह्मचारिणाम् ॥ ६९९ ॥
मान्त्रं पार्थिवमाग्नेयं वायव्यं दिव्यमेव च । वारुणं मानसं चेति स्नानं सप्तविधं स्मृतम् ॥ ७०० ॥
आपोहिष्ठेति वै मान्त्रं मृदालम्भं च पार्थिवम् । भस्मना स्नानमाग्नेयं स्नानं गोरजसानिलम् ॥ ७०१ ॥
आतपे सति या वृष्टिर्दिव्यस्नानं तदुच्यते । बहिर्नद्यादिषु स्नानं वारुणं प्रोच्यते बुधैः ॥ ७०२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ध्यानं यन्मनसा विष्णोर्मानसं तत्प्रकीर्तितम् । अतः स्नानेषु सर्वेषु मानसं स्नानमुत्तमम् ॥ ७०३ ॥
स्नानां मानसं स्नानं मन्वाद्यैः परमं स्मृतम् । कृतेन येन मुच्यन्ते गृहस्था अपि ते द्विजाः ॥ ७०४ ॥

## अथ शौचे

सत्यं शौचं तपः शौचं शौचमिन्द्रियनिग्रहः । सर्वभूतदया शौचं जलशौचं च पञ्चमम् ॥ ७०५ ॥
शुचि भूमिगतं तोयं शुचिर्नारी पतिव्रता । शुचिर्धर्मपरो राजा ब्रह्मचारी सदा शुचिः ॥ ७०६ ॥
आरम्भे वर्तमानस्य मैथुनाभिरतस्य च । कुतः शौचं भवेत्तस्य ब्राह्मणस्य युधिष्ठिर ! ॥ ७०७ ॥
यदोऽङ्गशोणितकषायितचीवराणां सन्मांसभक्षणविचक्षणदक्षिणानाम् ।
विद्वन्निकायगुणनिन्दनकोविदानां पावित्र्यमुत्तममहो ! द्विजपुङ्गवानाम् ॥ ७०८ ॥
आपः स्वभावतो मेध्याः किंपुनर्वह्नितापिताः । ऋषयस्तत्प्रशंसन्ति शुद्धिमुष्णेन वारिणा ॥ ७०९ ॥
उष्णोदकेन शुद्धिः स्यान्मूर्त्तिद्वयस्य मीलनात् । शीताम्बुनापि शुद्धिःस्यान्मूर्त्तिर्माहेश्वरा यतः ॥ ७१० ॥
मनु०— नासूर्ये हि व्रजेन्मार्गे नादृष्टां भूमिमाक्रमेत् । परिपूताभिरद्भिश्च कार्यं कुर्वीत नित्यशः ॥ ७११ ॥
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम् । सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् ॥ ७१२ ॥
आदित्य पु०—आपः पूता भवन्त्येता वस्त्रपूता ध्रुवं यतः । ततोऽद्भिः सर्वकार्याणि पूताभिः सर्वसिद्धये ॥ ७१३ ॥
अहिंसा तु परो धर्मः सर्वेषां प्राणिनां यतः । तस्मात्सर्वं प्रयत्नेन वस्त्रपूतेन कारयेत् ॥ ७१४ ॥
आसंवत्सरेण यत्पापं कैवर्तस्येह न जायते । एकाहेन तदाप्नोति अपूतजलसङ्ग्रही ॥ ७१५ ॥

For Private and Personal Use Only

नगरपु०— कुसुम्भकुङ्कुमाम्भोवन्निचित्तं सूक्ष्मजन्तुभिः । सुदृढेनापि वस्त्रेण शक्यं शोधयितुं जलम् ॥ ७१६ ॥

उत्तरमीमांसायाम्—लूतास्यतन्तुगलिते ये बिन्दौ सन्ति जन्तवः । सूक्ष्मा भ्रमरमानास्ते नैव मान्ति त्रिविष्टपे ॥ ७१७ ॥

सूक्ष्माणि जन्तूनि जलश्रयाणि जलस्य वर्णाकृतिसंश्रितानि ।
तस्माज्जलं जीवदयानिमित्तं निर्ग्रन्थशूराः परिवर्जयन्ति ॥ ७१८ ॥

विंशत्यङ्गुलमानं तु त्रिंशदङ्गुलमायतो । तद्वस्त्रं द्विगुणीकृत्य गालयेज्जलमापिबन् ॥ ७१९ ॥

तस्मिन्वस्त्रे स्थिताञ्जीवान्स्थापयेज्जलमध्यतः । एवं कृत्वा पिबेत्तोयं स याति परमां गतिम् ॥ ७२० ॥

दक्षस्मृ०— शौचं च द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा । मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम् ॥ ७२१ ॥

शौचमाभ्यन्तरं त्यक्त्वा भावशुद्ध्यात्मकं शुभम् । जलादि शौचं यत्रेष्टं मूढविस्मापनं हि तत् ॥ ७२२ ॥

याज्ञवल्क्य०—कालोऽग्निः कर्मकृद्वायुर्मनो ज्ञानं तपो जलम् । पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥ ७२३ ॥

मिता०— रश्मिरग्नी रजश्छाया गौरश्वो वसुधाऽनिलः । विप्रुषो मक्षिकास्पर्शे वत्सः प्रसवने शुचिः ॥ ७२४ ॥

पन्थानश्च विशुद्ध्यन्ति सोमसूर्यांशुमारुतैः । श्मश्रु चास्यगतं दन्तं सृक्कं त्यक्त्वा ततः शुचिः ॥ ७२५ ॥

स्नात्वा पीत्वा क्षुते सुप्ते भुक्ते रथ्याप्रसर्पणे । आचान्तः पुनराचामेद्वासो व्युत्परिधाय च ॥ ७२६ ॥

रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः । मारुतेनैव शुद्ध्यन्ति पक्वेष्टकचितानि च ॥ ७२७ ॥

श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियश्चात्मनः । सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम् ॥ ७२८ ॥ 

मनु०— मक्षिका विप्रुषश्छाया गौरश्वसूर्यरश्मयः । रजो भूर्वायुरश्मिश्च स्पर्शमेध्यानि निर्दिशेत् ॥ ७२९ ॥

For Private and Personal Use Only

क्षान्त्या शुद्ध्यन्ति विद्वांसो दानेनाकार्यकारिणः । प्रच्छन्नपापा जापेन तपसा वेदवित्तमाः ॥ ७३० ॥

अद्भिः गात्राणि शुद्ध्यन्ति मनः सत्येन शुद्ध्यति । विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्ध्यति ॥ ७३१ ॥

नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् । ब्रह्मचारिगतं भैक्षं नित्यं शुद्धमिति स्थितिः ॥ ७३२ ॥

सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् । योऽर्थशुचिः शुचिः सोऽत्र न मृद्वारिशुचिः शुचिः ॥ ७३३ ॥

विष्णुभक्तिच०–विष्णूत्सवसमायातान्स्पृष्ट्वा हीनजनान्क्वचित् । न कार्या ह्यशुचेः शङ्का पुण्यास्ते भक्तिपाविताः ॥७३४॥

आविकं तु सदा वस्त्रं पवित्रं राजसत्तम ! । पितृदेवमनुष्याणां क्रियायां च विशिष्यते ॥ ७३५ ॥

धौताधौतं तथा दग्धं सन्धितं रजकाहृतम् । शुक्रमूत्ररक्तलिप्तं तथापि परमं शुचि ॥ ७३६ ॥ वि० ॥

श्वानगर्दभचाण्डालान्मद्यभाण्डं रजस्वलाम् । देवार्चकं च संस्पृश्य सचेलं स्नानमाचरेत् ॥ ७३७ ॥

## अथ चौर्यं.

पद्मपु०— परस्वं तृणमात्रं च मनसापि न यो हरेत् । न पश्यन्ति विशांश्रेष्ठ ! ते नरकयातनाम् ॥ ७३८ ॥

मिता०— धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः । स्वजातीयगृहादेव कृच्छ्राब्देन विशुद्ध्यति ॥ ७३९ ॥

मनुष्याणां च हरणे स्त्रीणां क्षेत्रगृहस्य च । कूपवापीजलानां च शुद्धिश्चान्द्रायणेन वा ॥ ७४० ॥

द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मनि । चरेत्सान्तपनं कृच्छ्रं तन्निर्गत्यात्मशुद्धये ॥ ७४१ ॥

भक्ष्यभोज्यापहरणे यानशय्यासनस्य च । पुष्पमूलफलानां च पञ्चगव्यं विशोधनम् ॥ ७४२ ॥

तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च । चेलचर्मामिषाणां च त्रिरात्रं स्यादभोजनम् ॥ ७४३ ॥

मुषको धान्यहारी स्याद्यानमुष्ट्रः फलं कपिः । जलं प्लवः पयः काको गृहकारी ह्युपस्करम् ॥ ७४४ ॥
मधु दंशः पलं गृध्रो गां गोधाऽग्नि बकस्तथा । श्वित्री वस्त्रं श्वा रसं तु चारी लवणहारकः ॥ ७४५ ॥

## अथ देहाशुचित्वे.

मिता०— शिराः शतानि सप्तैव नव स्नायुशतानि च । धमनीनां शते द्वे च पञ्च पेशीशतानि च ॥ ७४६ ॥
एकत्रिंशल्लक्षणानि तथा नवशतानि च । षट्पञ्चाशच्च जानीयात् शिरा धमनिसंयुताः ॥ ७४७ ॥
सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः । शरीरकस्यापि कृते मूढा पापानि कुर्वते ॥ ७४८ ॥
विष्णुपु०— मांसासृक्पूयविण्मूत्रस्नायुमज्जाऽस्थिसंहतौ । देहे चेत्प्रीतिमान्मूढो भविता नरकेऽपि सः ॥ ७४९ ॥
शङ्खस्मृ०—शरीरं धर्मसर्वस्वं रक्षणीयं प्रयत्नतः । शरीराच्छ्रवते धर्मः पर्वतात्सलिलं यथा ॥ ७५० ॥

## अथ दन्तधावने.

प्रतिपद्दर्शषष्ठीषु मध्याम्ते नवमीतिथौ । सङ्क्रान्तिदिवसे प्राप्ते न कुर्याद्दन्तधावनम् ॥ ७५१ ॥
उपवासे तथा श्राद्धे न कुर्याद्दन्तपावनम् । दन्तानां काष्ठसंयोगो हन्ति सप्तकुलानि वै ॥ ७५२ ॥
विष्णुभक्तिचन्द्र०—उपवासे तथा श्राद्धे न कुर्याद्दन्तधावनम् । दन्तानां काष्ठसंयोगो हन्ति सप्त कुलानि वै ॥ ७५३ ॥
प्रतिपद्दर्शषष्ठीषु नवम्यां दन्तधावनम् । पर्णैरन्यत्र काष्ठैस्तु जिह्वोल्लेखः सदैव हि ॥ ७५४ ॥
अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ । अपां द्वादशगण्डुषैर्विदध्याद्दन्तधावनम् ॥ ७५५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनम् । व्रते चैतानि चत्वारि चरितव्यानि नित्यशः ॥ ७५६ ॥
असकृज्जलपानात्तु ताम्बूलस्य च भक्षणात् । उपवासः प्रदुष्येत दिवा स्वापाच्च मैथुनात् ॥ ७५७ ॥
विवेकविलासे—व्यतिपाते रविवारे सङ्क्रान्तौ ग्रहणेन च । दन्तकाष्ठं नवाष्टैकभूतपक्षान्तषड्घ्नुषु ॥ ७५८ ॥
काशश्वासजराजीर्णशोकतृष्णास्यपाकयुक् । तन्न कुर्याच्छिरोनेत्रहृत्कर्णामयवानपि ॥ ७५९ ॥

## अथ क्षमायाम्.

तुर्यारण्यके— क्षमा ब्रह्म क्षमा विद्या क्षमा भूतं च भावि च । क्षमा तपः क्षमा शौचं क्षमयेदं धृतं जगत् ॥ ७६० ॥
क्षमा यज्ञः क्षमा धर्मः क्षमा वेदाः क्षमा श्रुतम् । यस्तामेवं विजानीते स सर्वं क्षन्तुमर्हति ॥ ७६१ ॥
तां क्षमामीदृशीं कृष्णे ! कथमस्मद्विधस्त्यजेत् । यस्यां ब्रह्म च वेदाश्च सर्वमेव प्रतिष्ठितम् ॥ ७६२ ॥

## अथ मांसे.

मनु०— वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः । मांसानि च न खादेत तयोः पुण्यफलं समम् ॥ ७६३ ॥
मिताक्षरा०— सर्वान्कामानवाप्नोति हयमेधफलं तथा । गृहेऽपि निवसन्विप्रो मुनिर्मांसविवर्जनात् ॥ ७६४ ॥
स्कन्द०— भोक्ताऽनुमन्ता संस्कर्त्ता क्रयिविक्रयिहिंसकाः । उपकर्त्ता घातयिता हिंस्रकश्चाष्टधाऽधम ! ॥ ७६५ ॥
यः स्वार्थं मांसपचनं कुरुते पापमोहितः । यावन्ति पशुरोमाणि तावत्स नरकं व्रजेत् ॥ ७६६ ॥
परप्राणैस्तु ये प्राणान्स्वान्पुष्णन्ति हि दुर्धियः । आकल्पं नरकान्भुक्त्वा भुज्यन्ते तत्र तैः पुनः ॥ ७६७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जातु मांसं न भोक्तव्यं प्राणैः कण्ठगतैरपि । भोक्तव्यं तर्हि भोक्तव्यं स्वमांसं नेतरस्य च ॥ ७६८ ॥
क्व मांसं क्व शिवे भक्तिः क्व मद्यं क्व शिवार्चनम् । मद्यमांसरतानां हि दूरे तिष्ठति शङ्करः ॥ ७६९ ॥
चिखादिषति यो मांसं प्राणिप्राणापहारतः । उन्मूलयत्यसौ मूलं दयाख्यं धर्मशाखिनः ॥ ७७० ॥
अशनीयन्सदा मांसं दयां यो हि चिकीर्षति । ज्वलति ज्वलने वल्लीं स रोपयितुमिच्छति ॥ ७७१ ॥
हन्ता पलस्य विक्रेता संस्कर्ता भक्षकस्तथा । क्रेताऽनुमन्ता दाता च घातका एव यन्मनुः ॥ ७७२ ॥
अनुमन्ता विशसिता निहन्ता क्रयविक्रयी । संस्कर्ता चोपकर्ता च खादकश्चेति घातकाः ॥ ७७३ ॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् । न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ॥ ७७४
ये भक्षयन्त्यन्यपलं स्वकीयपलपुष्टये । त एव घातका यन्न वधको भक्षकं विना ॥ ७७५ ॥
मिष्टान्नान्यपि विष्टासादमृतान्यपि मूत्रसात् । स्युर्यस्मिन्नङ्गकस्यास्य कृते कः पापमाचरेत् ॥ ७७६ ॥
मांसाशने न दोषोऽस्तीत्युच्यते यैर्दुरात्मभिः । व्याधगृध्रवृकव्याघ्रशृगालास्तैर्गुरूकृताः ॥ ७७७ ॥
मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वे निरुक्तिं मनुरब्रवीत् ॥ ७७८ ॥
मांसास्वादनलुब्धस्य देहिनं देहिनं प्रति । हन्तुं प्रवर्त्तते बुद्धिः शाकिन्या इव दुर्धियः ॥ ७७९ ॥
ये भक्षयन्ति पिशितं दिव्यभोज्येषु सत्स्वपि । सुधारसं परित्यज्य भुञ्जते ते हलाहलम् ॥ ७८० ॥
न धर्मो निर्दयस्यास्ति पलादस्य कुतो दया । पललुब्धो न तद्वेत्ति विद्याद्वोपदिशेन्न हि ॥ ७८१ ॥
केचिन्मांसं महामोहादश्नन्ति न परं स्वयम् । देवपित्रतिथिभ्योऽपि कल्पयन्ति यदूचिरे ॥ ७८२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृत्वा स्वयं वाप्युत्पाद्य परोपहृतमेव वा । देवान्पितृन्समभ्यर्च्य खादन्मांसं न दुष्यति ॥ ७८२ ॥
मन्त्रसंस्कृतमप्यद्याद्यवाल्पमपि नो पलम् । भवेज्जीवितनाशाय हालाहललवोऽपि हि ॥ ७८४ ॥

## अथ मद्ये.

मनु०— सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् । तया सकाये निर्दग्धे मुच्यते किल्बिषात्ततः ॥७८६॥
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् । गौडी माध्वी च पष्टी च विज्ञेया त्रिविधा सुरा ॥७८६॥
मिता०— सुरां पीत्वा द्विजं हत्वा रुक्मं हृत्वा द्विजन्मनः । संयोगं पतितैर्गत्वा द्विजश्चान्द्रायणं चरेत् ॥ ॥७८७ ॥
पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत् । इहैव सा शुनी गृध्री सूकरी चोपजायते ॥ ७८९ ॥
मदिरापानमात्रेण बुद्धिर्नश्यति दूरतः । वैदग्धी बन्धुरस्यापि दौर्भाग्येणेव कामिनी ॥ ७८९ ॥
पापाः कादम्बरीपानविवशीकृतचेतसः । जननीं हा प्रियीयन्ति जननीयन्ति च प्रियाम् ॥ ७९० ॥
न जानाति परं स्वं वा मद्याच्चलितचेतनः । स्वामीयति वराकः स्वं स्वामिनं किङ्करीयति ॥ ७९१ ॥
मद्यपस्य शवस्येव लुठितस्य चतुष्पथे । मूत्रयन्ति मुखे श्वानो व्यात्ते विवरशङ्कया ॥ ७९२ ॥
मद्यपानरसे मग्नो नग्नः स्वपिति चत्वरे । गूढं च स्वमभिप्रायं प्रकाशयति लीलया ॥ ७९३ ॥
वारुणीपानतो यान्ति कान्तिकीर्तिमतिश्रियः । विचित्राश्चित्ररचना विलुठत्कज्जलादिव ॥ ७९४ ॥
भूतार्त्तवन्नरीनर्ति रारटीति स शोकवत् । दाहज्वरार्त्तवद् भूमौ सुरापो लोलुठीति च ॥ ७९५ ॥
विदधत्यङ्गशैथिल्यं ग्लापयन्तीन्द्रियाणि च ।मूर्च्छामतुच्छां यच्छन्ति हाला हालाहलोपमा ॥ ७९६ ॥

For Private and Personal Use Only

विवेकः संयमो ज्ञानं सत्यं शोचं दया क्षमा । मद्यात्मलीयते सर्वं तृण्या वह्निकणादिव ॥ ७९७ ॥
दोषाणां कारणं मद्यं मद्यं कारणमापदाम् । रोगातुर इवापथ्यं तस्मान्मद्यं विवर्जयेत् ॥ ७९८ ॥

## अथ मधुनि.

यो ददाति मधु श्राद्धे मोहितो धर्मलिप्सया । स याति नरकं घोरं खादकैः सह लम्पटैः ॥ ७९९ ॥
सप्तग्रामे च यत्पापमग्निना भस्मसात्कृते । तदेतज्जायते पापं मधुबिन्दुप्रभक्षणात् ॥ ८०० ॥
मद्ये मांसे मधुनि च नवनीते बहिर्नीते । उत्पद्यन्ते विलीयन्ते सुसूक्ष्मा जन्तुराशयः ॥ ८०१ ॥
इति०— मधु मांसं च ये नित्यं वर्जयन्तीह मानवाः । जन्मप्रभृति मत्स्यांश्च सर्वे ते मुनयः स्मृताः ॥ ८०२ ॥
मिता०— मधुमांसाशने कार्यः कृच्छ्रः शेषकृतानि च । प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव विशुध्यति ॥ ८०३ ॥
मधु मांसं च योऽश्नीयाच्छ्राद्धं सूतकमेव च । प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेत् ॥ ८०४ ॥
अनेकजन्तुसंघातनिघातनसमुद्भवम् । जुगुप्सनीयं लालावत्कः स्वादयति माक्षिकम् ॥ ८०५ ॥
भक्षयन्माक्षिकं क्षुद्रजन्तुलक्षक्षयोद्भवम् । स्तोकजन्तुनिहन्तृभ्यः सौनिकेभ्योऽतिरिच्यति ॥ ८०६ ॥
एकैककुसुमक्रोडाद्रसमापीय मक्षिकाः । यद्वमन्ति मधूच्छिष्टं तदश्नन्ति न धार्मिकाः ॥ ८०७ ॥
अप्यौषधकृते जग्धं मधु श्वभ्रनिबन्धनम् । भक्षितः प्राणनाशाय कालकूटकणोऽपि हि ॥ ८०८ ॥
मधुनोऽपि हि माधुर्यमबोधैरहहोच्यते । आसाद्यन्ते यदास्वादाच्चिरं नरकवेदनाः ॥ ८०९ ॥
मक्षिकामुखनिष्ठ्यूतं जन्तुघातोद्भवं मधु । अहो पवित्रं मन्वाना देवस्नाने प्रयुञ्जते ॥ ८१० ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्तर्मुहूर्तात्परतः सुसूक्ष्मा जन्तुराशयः । यत्र मूर्च्छन्ति तन्नाद्यं नवनीतं विवेकिभिः ॥ ८११ ॥
एकस्यापि हि जीवस्य हिंसने किमघं भवेत् । जन्तुजातमयं तत्को नवनीतं निषेवते ॥ ८१२ ॥
उदुम्बरवटप्लक्षकाकोदुम्बरशाखिनाम् । पिप्पलस्य च नाश्नीयात् फलं कृमिकुलाकुलम् ॥ ८१३ ॥

## अथ मूलके.

मूलकेन समं चान्नं यस्तु भुङ्क्ते नराधमः । तस्य शुद्धिर्न विद्येत चान्द्रायणशतैरपि ॥ ८१४ ॥
यस्मिन्गृहे स दानार्थं मूलकः पच्यते जनैः । श्मशानतुल्यं तद्वेश्म पितृभिः परिवर्जितम् ॥ ८१५ ॥
पितॄणां देवतानां च यः प्रयच्छति मूलकम् । स याति नरकं घोरं यावदाभूतसंप्लवम् ॥ ८१६ ॥
गोविन्दकीर्त्तने–अज्ञानेन कृतं देव ! मया मूलकभक्षणम् । तत्पापं यातु गोविन्द ! गोविन्द इति कीर्त्तनात् ॥८१७॥ गोवि०॥
यस्तु वृन्ताककालिङ्गमूलकानां च भक्षकः । अन्तकाले स मूढात्मा न मां स्मरिष्यति प्रिये ! ॥ ८१८ ॥
भुक्तं हालाहलं तेन कृतं चाभक्ष्यभक्षणम् । तेन क्रव्यादनं देवि ! यो भक्षयति मूलकम् ॥ ८१९ ॥
रसोनं गृञ्जनं चैव पलाण्डं पिण्डमूलकम् । मत्स्यमांससुराश्चैव मूलकस्तु ततोऽधिकः ॥ ८२० ॥
पुत्रमांसं वरं भुक्तं न तु मूलकभक्षणम् । भक्षणान्नरकं गच्छेद्वर्जनात्स्वर्गमाप्नुयात् ॥ ८२१ ॥
नीलीक्षेत्रं वपेद्यस्तु मूलकं चोपदंशति । न तस्य नरकोत्तारो यावदिन्द्राश्चतुर्दश ॥ ८२२ ॥
मिता०— पलाण्डं विड् वराहं च छत्राकं ग्रामकुक्कुटम् । लशुनं गृञ्जनं चैव जग्ध्वा चान्द्रायणं चरेत् ॥ ८२३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# अथ रात्रि भोजने

ये रात्रौ सर्वदाऽऽहारं वर्जयन्ति सुमेधसः । तेषां पक्षोपवासस्य फलं मासेन जायते ॥ ८२४ ॥

विवेकविलासे—भानोः करैरसंस्पृष्टमुच्छिष्टं प्रेतसञ्चरात् । सूक्ष्मजीवाकुलं वापि निशि भोज्यं न युज्यते ॥ ८२५ ॥

चत्वारो नरकद्वाराः प्रथमं रात्रिभोजनम् । परस्त्रीगमनं चैव सन्धानानन्तकायके ॥ ८२६ ॥

नोदकमपि पातव्यं रात्रावत्र युधिष्ठिर ! । तपस्विना विशेषेण गृहिणा तु विवेकिना ॥ ८२७ ॥

मृते स्वजनमात्रेऽपि सूतकं जायते किल । अस्तंगते दिवानाथे भोजनं क्रियते कथम् ? ॥ ८२८ ॥

रक्तीभवन्ति तोयानि अन्नानि पिशितानि च । रात्रौ भोजनसक्तस्य ग्रासे तन्मांसभक्षणम् ॥ ८२९ ॥

आयुर्वेदे— हृन्नाभिपद्मसंकोचश्चण्डरोचिरपायतः । अतो नक्तं न भोक्तव्यं सूक्ष्मजीवादनादपि ॥ ८३० ॥

चत्वारि खलु कर्माणि सन्ध्याकाले विवर्जयेत् । आहारं मैथुनं निद्रां स्वाध्यायं च विशेषतः ॥ ८३१ ॥

आहाराज्जायते व्याधिः क्रूरगर्भश्च मैथुनात् । निद्रातो धननाशश्च स्वाध्याये मरणं भवेत् ॥ ८३२ ॥

तत्त्वं मत्वा न भोक्तव्यं रात्रौ पुंसा सुमेधसा । क्षेमं शौचं दयाधर्मं स्वर्गं मोक्षं च वाञ्छता ॥ ८३३ ॥

दिवसस्याष्टमे भागे मन्दीभूते दीवाकरे । नक्तं तद्धि विजानीयान्न नक्तं निशि भोजनम् ॥ ८३४ ॥

नैवाहुतिर्न च स्नानं न श्राद्धं देवतार्चनम् । दानं वा विहितं रात्रौ भोजनं तु विशेषतः ॥ ८३५ ॥

संध्यायां यक्षरक्षोभिः सदा भुक्तं कुलोद्वह ! । सर्ववेलां व्यतिक्रम्य रात्रौ भुक्तमभोजनम् ॥ ८३६ ॥

अन्नं प्रेतपिशाचाद्यैः सञ्चरद्भिर्निरङ्कुशैः । उच्छिष्टं क्रियते यत्र तत्र नाद्याद्दिनात्यये ॥ ८३७ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घोरान्धकाररुद्धाक्षैः पतन्तो यत्र जन्तवः । नैव भोज्ये निरीक्ष्यन्ते तत्र भुञ्जीत को निशि ॥ ८३८ ॥
मेधां पिपीलिका हन्ति यूका कुर्याज्जलोदरम् । कुरुते मक्षिका वान्तिं कुष्ठं रोगं च कोलिकः ॥ ८३९ ॥
कण्टको दारुखण्डं च वितनोति गलव्यथाम् । व्यञ्जनान्तर्निपतितस्तालु विध्यति वृश्चिकः ॥ ८४० ॥
विलग्नश्च गले वालः स्वरभङ्गाय जायते । इत्यादयो दृष्टदोषाः सर्वेषां निशि भोजने ॥ ८४१ ॥
नापेक्ष्य सूक्ष्मजन्तूनि निष्पद्यात्प्राशुकान्यपि । अप्युद्यत्केवलज्ञानैर्नादृतं यन्निशाशनम् ॥ ८४२ ॥
धर्मविन्नैव भुञ्जीत कदाचन दिनात्यये । बाह्या अपि निशाभोज्यं यदभोज्यं प्रचक्षते ॥ ८४३ ॥
त्रयीतेजोमयो भानुरितो वेदविदो विदुः । तत्करैः पूतमखिलं शुभं कर्म समाचरेत् ॥ ८४४ ॥
संशसज्जीवसंधातं भुञ्जाना निशि भोजनम् । राक्षसेभ्यो विशिष्यन्ते मूढात्मानः कथं नु ते ॥ ८४५ ॥
वासरे च रजन्यां च यः खादन्नेव तिष्ठति । शृङ्गपुच्छपरिभ्रष्टः स्पष्टं स पशुरेव हि ॥ ८४६ ॥
अह्नोमुखेऽवसाने च यो द्वे द्वे घटिके त्यजन् । निशाभोजनदोषज्ञोऽश्नात्यसौ पुण्यभाजनम् ॥ ८४७ ॥
उलूककाकमार्जारगृध्रशम्बरशूकराः । अहिवृश्चिकगोधाश्च जायन्ते रात्रिभोजनात् ॥ ८४८ ॥
श्रूयते ह्यन्यत्र पवनाक्रमनादत्यैव लक्ष्मणः । निशाभोजनशपथं कारितो वनमालया ॥ ८४९ ॥

इति महाभारतस्मृतिपुराणादिगतधर्मश्लोकाः

वस्तुतत्त्वविहीनानामाज्ञासिद्धिविधायिनाम् । चातुर्वर्णोत्तमो विप्रः ख्यातः पूजितः सत्कृतः ॥ १ ॥
य इमे वृषला हीनास्ते विज्ञाव्रतकर्मणि । तद्देयं तेषु न श्राद्धं वर्णाग्र्यैः कदाचन ॥ २ ॥

For Private and Personal Use Only

पक्षपातं परित्यज्य प्रस्तावेऽस्मिन्विचार्यते । न्यायमार्गं गतैः सद्भिर्युक्तायुक्तपरीक्षकैः ॥ ३ ॥

यत्तावत्केनचिदुक्तम्—

सर्ववर्णप्रधाना ब्राह्मणा इति । तत्कोऽयं ब्राह्मणो नाम ? किं शरीरेण ? किं जात्या ? किं जीवेन ? किं कुलेन ? किं योन्या ? किं ज्ञानेन ? किं शौचाचारेण ! किं तपसा ? किं संस्कारेण वा ? इति । एतेषां मध्ये केन ब्राह्मणो भवति ? इति ब्रवीतु कश्चिद्ब्राह्मणस्तत्पक्षपाती वा ।

शरीरेण तावन्न भवति ब्राह्मणः । कथम् ? ब्राह्मणक्षत्रियवैश्यशूद्रशरीराणामविशेषात् , किं च शुक्रशोणितमज्जास्थिश्यामादिवर्णयौवनादीनां च भेदाभावात्; किं च मृतस्य ब्राह्मणस्य शरीरदहने ज्ञातीनां तथाग्नेर्ब्रह्महत्या स्यात् । अतो ज्ञायते शरीरेण तावद्ब्राह्मणो न भवति ॥

जात्यापि तावद्ब्राह्मणो न भवति । कस्मात् ? नित्या जातिरविनाशिनी च ब्राह्मणैरभिप्रेता तस्याः पतनविनाशौ च विद्येते; श्रूयते च मानवे धर्मे तस्याः पतनम्—

सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रो भवति ब्राह्मणक्षीरविक्रयी ॥ १ ॥
इतरेषां तु पण्यानां विक्रयादधिकं पयः । ब्राह्मणस्त्वेकरात्रेण वैश्यभावं निगच्छति ॥ २ ॥
वृषलीफेनपीनस्य निःश्वासोपहतस्य च । तत्रैवातिप्रसक्तस्य निष्कृतिर्नोपलभ्यते ॥ ३ ॥
ऋतुकालमतिक्रम्य यो हि गच्छति मैथुनम् । स एव ब्रह्महा नाम हतं ब्रह्म तदात्मजम् ॥ ४ ॥
ऋतुकाले व्यतिक्रान्ते यस्तु सेवेत मैथुनम् । ब्रह्महत्याफलं तस्य सूतकं च दिने दिने ॥ ५ ॥



For Private and Personal Use Only

किं चापरं दृश्यते–कैवर्तचर्मकाररजकशौण्डकादिब्राह्मणाः। यद्यपि तैर्ब्राह्मणैस्तेषु गृहेषु भुक्तम्, नित्यत्वाद्वर्णानां कथं पतनं भवेत्तस्याः ? अतो ज्ञायते–जात्या ब्राह्मणो न भवति, कस्मात् ? वेदमन्वादिवचनात्। उक्तं च वेदे—

इन्द्रः पशुरासीत् तमायजन्तः शतेन लोकं जयन्त्यस्मिन्। शतेन लोको भविष्यति। तं जेष्यति। पशवोऽपि देवा आपद्यन्त इति।

एवं यावत्—अग्निः पशुरासीत् इति पुनः पठितव्यम्।

उक्तं च मनौ—अधीत्य चतुरो वेदान्साङ्गोपाङ्गान्सलक्षणान्। शूद्रात्प्रतिग्रहं कृत्वा खरो भवति ब्राह्मणः ॥ १ ॥

खरो द्वादशजन्मानि षष्टिजन्मानि शूकरः। श्वानः सप्ततिजन्मानि इत्येवं मनुरब्रवीत् ॥ २ ॥

भारते चोक्तम्—सप्तव्याधा दशार्णायां मृगाः कालंजरे गिरौ। चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे ॥ १ ॥

ते च जाता कुरुक्षेत्रे ब्राह्मणा वेदपारगाः। प्रस्थिता दीर्घमध्वानं ऋजवो ! मा विषीदथ ॥ २ ॥

पशवोऽपि यदा देवा देवा हि पशवस्तथा। ब्राह्मणाः स्युस्तथा श्वानः श्वानो ब्राह्मणा अपि ॥ ३ ॥

तथा मृगहंसचक्रवाकदर्शनसद्भावात्। ततो जानीमः–जीवेनापि ब्राह्मणो न भवति ॥

कुलेनापि ब्राह्मणो न भवति मुनीनां कुलदोषप्रसङ्गात्।

तथाचोक्तंश्रुतौ—हस्तिन्यामचलो जात उलूक्यां केशकम्बलः। अगस्त्योऽगस्तिपुष्पाच्च कौशिकः कुशसंस्तरात् ॥ १ ॥

कठिनात्कठिनोजातः शरगुल्माच्च गौतमः। द्रोणाचार्यस्तु कलशात्तित्तिरिस्तित्तिरीसुतः ॥ २ ॥

रेणुका जनयेद्रामं ऋष्यशृङ्गं मृगी वने। कैवर्त्ती जनयेद्व्यासं कक्षीवन्तं च शूद्रिका ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विश्वामित्रं च चाण्डाली वशिष्ठं चैव उर्वशी । विप्रजातिकुलाभावे ये ते ख्याता द्विजोत्तमाः ॥ ४ ॥

न तेषामृषीणां ब्राह्मणी माता तेऽपि लोकस्य ब्राह्मणाः । अतः श्रुति प्रामाण्यात्कुलेनापि ब्राह्मणो न भवति । ब्राह्मणाः प्राहुः—न योनौ ब्राह्मणानां प्रादुर्भावः, येन धर्मशास्त्रे एवं पठ्यते—

ब्राह्मणो मुखादासीद्बाहो राजन्यमित्यपि । ऊरस्तःस्यादयं वैश्यः शूद्रःपद्भ्यामजायत ॥ १ ॥

युक्त्या तावन्निरूप्यते—योन्या ब्राह्मणो न भवतीति । कस्मात् ?

ब्राह्मणा ये मुखाज्जाताः पूज्या विप्रा भवन्ति ते । शूद्रा इवाधुना जाता योनिजा हि कथं द्विजाः ॥ १ ॥

ब्राह्मणी कुत्रोद्भूता ? तस्मान्मुखादिति चेत् ? एवं तर्हि भगिन्या सह मैथुनमाचरितं ब्राह्मणैः । अथवा ब्राह्मणवन्मुखोद्भूता ब्राह्मणी न भवति, एवं सति अन्यत्रोत्पन्ना कथमब्राह्मणी ब्राह्मणं जनयेत् ? ।

किंचापरम्–'ब्रह्मणः पद्योः शूद्रो जात' इत्येव वैदिकी श्रुतिः । वयं तु ब्रूमः–पादौ तौ सततं देवतादीनां शिरोभिरभ्यर्च्येते, न कदाचिदपि मुखम्; मुखं हि नित्यमेवाशुचिश्रावि दुर्गन्धि, तत्र जाताः कथं ब्राह्मणाः श्रेष्ठाः ? अत एवोच्यते–योन्यापि ब्राह्मणो न भवति ।

ज्ञानेनापि ब्राह्मणो न भवति, किं पुनः शेषैः ? यतः–सर्वेऽपि पशुगोपालादयः स्वकार्यज्ञानसम्पन्नाः; ज्ञानं च पृथक् पृथग् उत्पद्यते; इति । य एव येन ज्ञानी, स एव तेन ब्राह्मणो भवति । दृश्यन्ते च केचिच्छूद्राः सन्तो वेदव्याकरणमीमांसकवैशेषिकप्रभृतिसर्वशास्त्रविदः । तेन ते ब्राह्मणा न भवन्तीति ।

तपसापि ब्राह्मणो न भवति । 

For Private and Personal Use Only

तपसा यदि भवेद्विप्रः सिद्धसाधनमिष्यते । सर्वमेतत्तपोमूलं तपो हि दुरतिक्रमम् ॥ १ ॥

ते च तपोयुक्ता न भवन्तीति । तस्मात्तपसापि ब्राह्मणो न भवतीति ।

संस्कारेणापि ब्राह्मणो न भवति, कथमिति चेत् ? क्षत्रियाणां वैश्यानां सीमन्तोन्नयनजातकर्मादिविशेषाः क्रियन्त एव, न च ते ब्राह्मणा भवन्ति, वशिष्ठादीनां ब्राह्मणकुलादन्यत्रोत्पन्नानां च जातकर्मादि न कृतमेव, तेऽपि प्रवरा द्विजा भवन्त्येव ।

व्रतसंस्कारेणापि ब्राह्मणो न भवति ।

संग्रहश्लोका—न शौचादिशरीरेण जातजीवकुले न च । तपसा ज्ञानयोन्याथ संस्कारैर्न द्विजो भवेत् ॥ १ ॥

न जटाभिर्न गात्रेण न जात्या नापि चान्यतः । गुणैः कुन्देन्दुविमलैर्व्रतनियमपरायणः ॥ २ ॥

यो वाहयति पापानि स वै ब्राह्मण उच्यते ।

दानशीलक्षमावीर्यध्यानप्रज्ञादयो गुणाः । यत्र सर्वे समासन्ति स वै ब्राह्मण उच्यते ॥ ३ ॥

ब्राह्मणो ब्रह्मचर्येण यथा शिल्पेन शिल्पिकः । अन्यथा नाम मात्रं स्यादिन्द्रगोपककीटवत् ॥ ४ ॥

तथाचोक्तं–धर्मशास्त्रे०सत्यं ब्रह्म तपोब्रह्म ब्रह्म चेन्द्रियनिग्रहः । सर्वभूतदयाब्रह्म तद्धि ब्राह्मणलक्षणम् ॥ १ ॥

एकवर्णमिदं सर्वं पूर्वमासीद्युधिष्ठिरः । क्रियाकर्मविभागेन चातुर्वर्ण्यं व्यवस्थितम् ॥ २ ॥

शूद्रोऽपि शीलसम्पन्नो गुणवान्ब्राह्मणो भवेत् । ब्राह्मणोऽपि क्रियाभ्रष्टः शूद्राऽपत्यसमो भवेत् ॥ ३ ॥

पञ्चेन्द्रियबलं घोरं यदि शूद्रोऽपि तीर्णवान् । तस्मै दानं प्रदातव्यं अप्रमेयं युधिष्ठिरः ॥ ४ ॥

न जातिर्दृश्यते राजन् ! गुणाः कल्याणकारकाः । वृत्तस्थमपि चण्डालं तमेव ब्राह्मणं विदुः ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्राह्मणक्षत्रियवैश्यशूद्राश्चैव युधिष्ठिर ! निर्वृत्तश्चरति यो धर्मं तमेव ब्राह्मणं विदुः ॥ ६ ॥
यदा न कुरुते पापं सर्वभूतेषु दारुणम् । कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ॥ ७ ॥
चतुर्वेदोऽपि यो विप्रः शुक्लं धर्मं न सेवते । वेदभारधरो मूर्खः स वै ब्राह्मणगर्दभः ॥ ८ ॥
शूद्रात्तत्प्रेष्यकारिणो ब्राह्मणस्य युधिष्ठिर ! । भूमावन्नं प्रदातव्यं यथा श्वानस्तथैव सः ॥ ९ ॥
कृषिवाणिज्यगोरक्षा राजसेवां चिकित्सितम् । ये विप्राः प्रतिपद्यन्ते न ते कौन्तेय ! ब्राह्मणाः ॥ १० ॥
गोरक्षकान्वाणिजकान्प्रेष्यान्वार्द्धुषिकांस्तथा । मैथुने च रतान्नित्यं विप्रान्शूद्रवदाचरेत् ॥ ११ ॥

तस्माच्छ्रुतप्रामाण्याच्चातुर्वर्ण्यं न युज्यते । यच्चोक्तं ब्राह्मणैः—'तीर्थस्नानभक्तच्छेदगोव्रतभस्मशयनगोमयभक्षणादिभिः पुण्यं भवतीति' तदपि न युज्यते; व्यासवचनात्—

नोदकक्लिन्नगात्रो हि स्नात इत्यभिधीयते । स स्नातो यो दमस्नातः स बाह्याभ्यन्तरशुचिः ॥ १ ॥
चित्तमन्तर्गतंदुष्टं तीर्थस्नानैर्न शुद्ध्यति । शतशोऽपि जलैर्धौतं सुराभाण्डमिवाशुचि ॥ २ ॥
आत्मानदी भारत ! पुण्यतीर्था सत्योदका शीलतटादयोर्मिः ।
तत्राभिषेकं कुरु पाण्डुपुत्र ! न वारिणा शुद्ध्यति चान्तरात्मा ॥ ३ ॥

भक्तच्छेदोऽप्यजीर्णादिदोषप्रतिपक्षभूतः, स पुण्यबुद्ध्या सेव्यमानः परं मोहाऽभिवृद्धये भवति, मोहश्च सर्वसंक्लेशानर्थहेतुः इति त्याज्य एव । अथात्मकामैः सुखितस्य चित्तमाधीयते, समाहितचित्तस्य कुशलं प्रति चित्तं प्रवर्त्तते, न क्षुत्तृषाभिभूतस्य, तस्माद्भक्तच्छेदेन पुण्यं न भवति; इति युक्तिरियम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ कश्चिद्ब्रूयात् 'श्रुतिस्मृतिविहितो धर्मः सर्वथा न्याय्य एव' इति तन्न, कस्मात् ? यस्माद्यः प्राणातिपातादिषु प्रवृत्तः, स त्याज्यः, विरुद्धत्वात् । यस्तु प्राणातिपातादेर्निवृत्तः, स ग्राह्योऽविपरीतत्वात् ।

श्रुतिस्मृतिवेदवचनं तथाहि–वाजसोनयागे पठ्यते बृहदारण्यके–एतत्पदत्रयं शिक्षयेद्दानं दमं दयामिति ।

तदेवं सौगतानां दानशीलक्षान्तिकरणाद्याख्याः प्रसिद्धाः । मानवे धर्मे षष्ठेऽध्याये यतिधर्मोपदेशे पठ्यते—

दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ।
धृतिः क्षमा दया स्तेयं शौचमिन्द्रिय निग्रहः । धीर्विद्या सत्यमक्रोधो दशमं धर्मलक्षणम् ॥ १ ॥
दशलक्षणानि धर्मस्य ये विप्रास्तमधीयते । अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ॥ २ ॥

तथा व्यासेनापि चतुष्टयलक्षणं कुर्वता पठितम्—

धर्मात्मा पण्डितो ज्ञेयो नास्तिको मूर्ख उच्यते । सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ॥ १ ॥
गच्छतस्तिष्ठतो वापि जाग्रतः स्वपितोऽपि वा । यन्न भूतहिताधायि तज्जीवितमनर्थकम् ॥ २ ॥
मर्त्तव्यमिति यद्दुःखं पुरुषस्योपजायते । युक्तं तेनानुमानेन परोऽपि परिरक्षितुम् ॥ ३ ॥
वरमेकस्य सत्त्वस्य प्रदत्ताऽभयदक्षिणा । न तु विप्रसहस्रेभ्यो गोसहस्रमलङ्कृतम् ॥ ४ ॥
सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते । नास्ति नास्त्येव हि स्वार्थः परस्यार्थमकुर्वतः ॥ ५ ॥
न तत्त्वं वचनं सत्यं नातत्त्वं वचनं मृषा । यद्भूतहितमत्यन्तं तत्सत्यमितरन्मृषा ॥ ६ ॥

यदेतत्सर्वमभिहितं मुनिभिस्तत्सुगतवचनवल्लोके आदेयम्, इदं तावद्विरुद्धवचनं न भवति । इदमपरमृषिवचनं विशेषेणावस्थितं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुर्गतिमार्गसूचकं तत्त्याज्यं बुधैः । तद्यथा सुत्रे तित्तिरिआणके पाठः—

'षट्त्रिंशत्संवत्सरे स्थिते गृहपतिर्मृगयां यायात् । स तत्र यात्वा यान्मृगान्हन्ति ते तरसा समानीयाः पुरोडासी भवन्ति, इति यागकर्मणि ।

वेदे वाजसेनेयके पाठः—' चक्षुस्ते सुंधामि, वाचस्ते सुन्धामि, मेढ्ं ते सुन्धामि, कुक्षिं ते सुन्धामि, नाभिं ते सुन्धामि, मनस्ते सुंधामि ' ।

उक्तं च सर्वशाखासु—षट्सहस्राणि युज्यन्ते पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनाद्नानि पशुभिस्त्रिभिः ॥ ९ ॥

उक्तं च यजुर्वेदे शतपथाध्याये—देवे सवितरि पुरुषमेधप्रकरणे नियुक्ते पुरुषान्ब्रह्मदक्षिणतः पुरुषेण नारायणेनाभिष्टौति—

' सहस्रशीर्षा वै पुरुषः, सहस्राक्षः, सहस्रशीर्षपदानि, शतेन षोडशार्द्धेन प्रथमं तावद्ब्राह्मणो ब्राह्मणमालभेत, क्षत्राय राजन्यम्, वैश्येभ्यो वैश्यम्, तपसे शूद्रम्, तमसे तस्करम्, नारकाय वीरहणं प्राप्यते क्लीबमित्येवमादीनां पुरुषाणां शतमालभेत् ।

उक्तंच—शतमालभेत, शतायुर्वै पुरुषः, शतेन्द्रियः शतवीर्यः, आयुर्वेद इन्द्रियं वीर्यमातन्वते इति सर्वाण्येतानि वचनानि प्राणातिपातसंसुचकानि ।

शतशाखः सामवेदः, तत्र मध्ये सौमित्रिकानां वेदे गोसवे दानोपदेशे पाठः—' इदं ते सुभगे ! भगं मधुसर्पिषालिख्य जिह्वया लेलिहामि, प्रजापतेर्मुखमेतत् द्वितीयम् ।

तथा ऋग्वेदे च त्रयस्त्रिंशत्तमेऽध्याये ब्राह्मणहरिश्चन्द्रकथायां पठ्यते—' नापुत्रस्य गतिरस्ति ' इति, ' सर्वे पशवो विदुः तस्मात्पुत्रो मातरं स्वसारं वाभिरोहति, एष पन्था उभगा पशुषे धोरेयं पुत्रीणामाक्रमन्ति, विशेषकामास्तं पश्यन्ति पशवो



For Private and Personal Use Only

वयांसि वा '। तस्मात्ते मात्रापि सह मैथुनीभवन्ति ।

अथावरं वह्निवायने पाठः प्रजापतिः स्वां दुहितरमभ्यकामयत् ।

आत्रेयस्मृतौ पठ्यते—न स्त्री दुष्यति जारेण नाग्निर्दहनकर्मणा । नापो मूत्रपुरीषेण न विप्रो वेदकर्मणा ॥ १ ॥

बलात्कारोपभुक्ता वा चौरहस्तगतापिवा । स्वयं विप्रतिपन्ना वा यदि वा विप्रवादिता ॥ २ ॥

तस्याज्या दूषिता नारी नास्यास्त्यागो विधीयते । स्त्रियो हि द्रव्यमतुलं नैता दुष्यन्ति केनचित् ॥ ३ ॥

मासि मासि रजो भूत्वा दुष्कृतान्यपकर्षति । पुष्पकाले उपासित्वा ऋतुकालेन शुद्ध्यति ॥ ४ ॥

असवर्णेन यो गर्भो नारीयोनौ निष्पद्यते । अशुद्धा सा भवेन्नारी यावच्छल्यं न मुञ्चति ॥ ५ ॥

एतान्यपि काममिथ्याचारागम्यगमनप्रतिपादकानि वचनानि। उक्तं च मानवे धर्मशास्त्रे प्रथमेऽध्याये सृष्टिवादसमुद्देशे—

सर्वं ब्राह्मणस्येदं यत्किंचिज्जगति गतम् । श्रेष्ठेनाभिजनेनेदं सर्वं ब्राह्मणोऽर्हति ॥

स्वयमेव ब्राह्मणो भुङ्क्ते सर्वस्येदं ददाति च । यच्छेषं स्याद्ब्राह्मणस्य भुञ्जते हीतरे जनाः ॥ १ ॥

एतान्यप्यदत्तादानप्रतिपादकानि वचनानि ।

न नर्मयुक्तं ह्यनृतं हिनस्ति न स्त्रीषु राजन्न विवाहकाले । प्राणात्यये सर्वधनात्यये च पञ्चानृतान्याहुरपातकानि ॥१॥

एतदपि मृषावादसंसूचकं वचनम् ।

तथा सौत्रायणीयनामाध्ययने विश्वरूपप्रश्नमध्यमकाण्डे इष्टीकल्पे पठितम्—' तस्माज्ज्यायांश्च कनीयांश्च, स्नुषा च श्वसुरश्च सुरां पीत्वा प्रललापतुः । आसवे मालव्यं हि पास्या वै मालव्यं ततो ब्राह्मणः सुरां पिबेत् । अतःसात्रायणीययज्ञे स्वगृहे मद्यसन्धान-मनुष्ठीयते ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्रैव सौत्रायणीयप्रकरणे पाठः–' नैव सुरां पीत्वा हिनस्ति, य एवंविधां सुरां पिबति प्रजापतिवीर्यमादधाति'। एतानि मद्यपानप्रतिपादकानि वचनानि।

## इदमपरं विरुद्धतरम्।

उक्तं च मनौ—ये शूद्रार्थमुपादाय अग्निहोत्रमुपासते। ते ऋत्विजो हि शूद्राणां ब्राह्मणादिषु गर्हिताः ॥ १ ॥
न यज्ञार्थं क्वचिच्छूद्राद्विप्रो भक्षेत कुत्रचित्। यजमानो हि भक्षित्वा चण्डालः प्रेत्य जायते ॥ २ ॥
शूद्रादादाय निर्वापं ये पचन्ति द्विजातयः। ते यान्ति नरकं घोरं ब्रह्मतेजोविवर्जिताः॥ ३ ॥
शूद्रान्नं शूद्रसम्पर्कं शूद्रेण च सहाशनम्। शूद्राज्ज्ञानागमो वापि स्वर्गस्थानपि पातयेत् ॥ ४ ॥
तपश्च अग्निहोत्रं च वैश्वदेवी तथाहुतिः। सर्वं तन्नश्यते तस्य शूद्रान्नपचने कृते ॥ ५ ॥
शूद्रान्नरसपुष्टाङ्ग आहिताग्निश्च नित्यशः। जपः शान्तिःकुतश्चापि गतिरूर्ध्वा न विद्यते ॥ ६ ॥

सर्वमेव एतच्छूद्रप्रतिग्रहादिकमनुष्ठीयते, न किंचिद्ब्राह्मणेन परित्यक्तम्। तस्मात्पाठमात्रमेव केवलमिति विरुद्धवचनं भवति।

इदमपरं दोषान्तरम्।

चैत्यवृक्षार्चनं पुमांश्चण्डालं वेदविक्रयिणम्। स्पृष्ट्वा देवलकं चैव सचेलो जलमाविशेत् ॥ १ ॥
चितिं च चितिकाष्टं च चाण्डालं यूपमेव च। स्पृष्ट्वा देवलकं विप्रं जलस्नानेन शुद्ध्यति ॥ २ ॥
रविं गणपतिं चैव इश्वरं इव जनार्दनम्। चण्डिकां पूजयेद्यस्तु स वै देवलकः स्मृतः ॥ ३ ॥



For Private and Personal Use Only

प्रख्यापनं प्रत्ययनं प्रश्नपूर्वः प्रतिग्रहः । याचनाध्ययनं चापि षड्विधो वेदविक्रयः ॥

बृहस्पतिस्मृतावुक्तम्०—मन्त्रभेदी पृथक्पाकी आदेशी वेदविक्रयी । तरुण्या योषितस्त्यागी पञ्चैते ब्रह्महाः स्मृताः ॥ १ ॥

आदिशन्ति च ये विप्रा नादिष्टाश्च पठन्ति ये । आदेशी पाठकश्चैव द्वावेतौ ब्रह्मघातकौ ॥ २ ॥

वेदाक्षराणि यावन्ति युज्यन्तेऽर्थस्य कारणात् । तावत्यो ब्रह्महत्यापि वेदविक्रयकारणात् ॥ ३ ॥

सातातपः प्राह०—वेदविक्रयनिर्दिष्टं स्त्रीषु यच्चार्जितं धनम् । न देयं पितृदेवेभ्यो यच्च क्लीबादुपार्जितम् ॥ ४ ॥

येनस्मृतावुक्तम्०—नैतांस्ततो निरीक्षेत चण्डालानन्त्यजान्क्वचित् । सुवर्णस्तेयिनां चैव वेदविक्रयिणं तथा ॥१॥

उक्तं च मनौ चतुर्थेऽध्याये०—शिल्पेन व्यवहारेण शूद्रपाठैश्च केवलैः । गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवनैः ॥ १ ॥

सत्यानृते तु वाणिज्यं एतैश्चापि स जीवति । सेवावृत्तिः समाख्याता तस्मात्तां परिवर्जयेत् ॥२॥

यमस्मृतौ पुनः पाठः—संवत्सरेण यत्पापं मत्स्याघाती समाप्नुयात् । एकाहेन तदाप्नोति सकृद्युक्ते तु लाङ्गले ॥१॥

निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ॥ २ ॥

उक्तं च मनावेकादशमेऽध्याये०—

न शूद्रराज्ये निवसेन्नाधर्मिकजनावृते । न षण्डकजनाक्रान्ते नोपसृष्टित्यजैर्नृभिः ॥ १ ॥

तदेवं विरुद्धवचनेन सकलपृथिव्यामप्यवस्थानं नास्तीति प्रतिपादितम् किं बहुना ? अनेन प्रकारेण चतुर्णां वर्णानां मध्ये बहिष्कृता ब्राह्मणाः, इत्यवसीयते

ब्राह्मणोत्कर्षवादेनात्मानं यः प्रतिपाद्यते । स वक्तव्यः सदा सद्भिर्वेदयुक्तैः सुभाषितैः ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्विजवदनचपेटां न्यायतत्त्वेषु मुद्रां श्रुतिपदकृतमात्राश्रेणिभङ्गैकदक्षाम् ।
द्विजसदसि निषण्णो यः समुत्कर्षतीमां क्षणमपि न पुरस्तात्तस्य तिष्ठन्ति विप्राः ॥ १ ॥
द्विजवदनचपेटा वेदाङ्कुशः सम्पूर्णः । कृतिरियं हेमचन्द्रसूरीणाम् ॥ हरिभद्रसूरिविरचिता ( इति प्रत्यन्तरे )



For Private and Personal Use Only